न प्रपन्नान् अद्याधुनाव दय या मुनिभिः सुरेंद्रान्॥८॥ इत्थं स्तुवंतो देवास्ते मुनयो दैत्यपीडिताः॥
एतस्मिन्नंतरे तत्र बलपुत्रो महासुरः॥९॥ तंजो नाम्नाऽभ्यगात् हर्तुं त्रिंशद्दक्षौहिणीयुतः॥ बाणबाणा
सनधरैः कूटमुद्गरपाणिभिः॥१०॥ रथैरश्वैश्च मत्तेभैर्वादयंतोथ दुंदुभीः॥ सुरेभ्यश्चापहर्तुं तां सुधां पी
त्वावशेषितां॥११॥ विलंघ्य सुबहून्देशान् पश्यन्मुनिभिः सुरान्॥ तान्हर्तुं मुधनस्तेजोहीनवीर्यान्सु
रान्मुनीन्॥१२॥ शमीवने शंशरणं प्रपन्नान्सुरैर्वृतः॥ बभंज परितो वृक्षान्सरांस्यत्र विनाशयन्॥
१३॥ तंजासुरभयत्रस्ताश्चुक्रुशुर्मुनयस्सुराः॥ ॥देवा ऊचुः॥ ॥हे शंभो भगवन्पुरांधकपुरं हत्वा घोरसः
सुरान् नाहकू दैत्यहरं स्वचक्रकमदासं रक्षितुं विष्णवे॥ अद्यास्मान् हर तंजकासुरभयग्रस्तानथास्मा
न्याहीश नदयानिधान हरते वन्हीक्षणानगावन॥१४॥ इत्थं देवैस्तुतो देवः पार्श्वस्थां प्राह चांबिकां॥
॥ईश्वर उवाच॥ ॥जहि तं सबलं देवि तंजं हंतुं धृतायुधा॥ स्वांशाच्छक्तिं विनिर्माय धृतशूलासिपा
णयः॥१५॥ नडिकां कोडिकां कालीं रेणुकां पंडिकां शिवां॥ दुर्गां मारीं च परितः स्थापयामास तत्र वै॥
॥१६॥ सस्मार स्वांशजं विष्णुं सोप्यागात्तत्र संभ्रमतः॥ नत्वा देवीमहेशानौ किंकरः किं करोम्यहं॥१७॥
ब्रुवंतमेवं तं विष्णुं दैत्यान्जहि सुरान्नच॥ शमीवनेशौ तंजारण्यमित्थं देव्यायियौ रणं॥१८॥ देवी
त्वसिं हमारुह्य धृतशूलवरायुधा॥ साट्टहासं विमुंचंती किरंती षुगणान्तदा॥१९॥ शक्तिभिः परितो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर०७ षाभिः धृतशूलासिपाणिभिः॥ तंजासुरमथाभ्यागात्विष्णुनाविबुधैःसह॥२०॥ शिवारूपेवि
लीनास्तेशांतिंजेपुर्महर्षयः॥ शमीवनेशविजयंप्रार्थयंतोंबिकांप्रति॥२१॥ ॥मुनयऊचुः॥॥
१७ क्षयद्वीरोदेवःसकलदिविषन्मौलिमुकुटीकुटीरंपादाब्जंभवदभयपादंकलयतां॥ महाजन्येधन्य
स्त्वमसिविबुधानांविजयतः॥ शमीमूलेशूलैर्जहिभगानेशांतकहर॥२२॥ इत्थंमहर्षिस्तवतो
षितोहरोजयंददौश्रीविजयेश्वरांबिकां॥ विष्णुंसुरांस्तंजवधेनियुक्तान्अथाविशाक्रोधपरोभ
वोग्रः॥२३॥ देवीत्रिशूलवरशानितमहस्तशस्त्रस्तुस्ताप्रकांडइवछिन्नकराःसमस्ताः॥ दैत्यानिपे
तुरवनौवरशूलबाणप्रासासिविष्णुकरचक्रनिकृत्तगात्राः॥२४॥ ताःशक्तयोदशसुदिशासुसं
स्थानानाविधायुधकरादितिजान्निजघ्नुः॥ तंजासुरोपिहतशेषबलेनविष्णुंसुरानशेषानद
यवत्प्रदाहयत॥२५॥ सुरद्रुमांस्तानसुरारणावनौसनीरुमेघाकृतिराबभौहरिः॥ ववर्षबाणैर
सुरेरितंवनंसंग्राममयंतवर्षपरोयथांबुदः॥२६॥ तेजाकृतिःसोप्यभवन्महासुरस्तंजासुरास्यं
हरिरूपधद्धरिः॥ नखैर्विदाराशुमहेभकुंभयोस्तद्रक्तगात्रःकरजैस्तदाबभौ॥२७॥ देवास्तदाजौ
दितिजान्महर्षिताः शक्तिभिरापूरितबाणशक्तयः॥ निजघ्नुरन्योन्यगदासिपातनैर्दैवाश्चन
याश्चशक्तयः॥२८॥ त्रिशूलपातेनतदांबिकावधीयतयमस्यधामप्रतिपेदिरेसुराः॥ रक्तापगाः
सुस्रुवरस्त्रजन्यैःपर्जन्यनादप्रतिमैस्तथास्त्रैः॥२९॥ मस्तिष्कफेनांस्त्रतरंगकच्छपामांसौघ
पंकाद्विरदोरुद्वीपाः॥ तत्रासुरोमात्यपरोममज्जतत्पुष्करण्यानिहितंतदामतौ॥३०॥ प्रगृह्ययावद्दि श्रीशिव
तिजांश्चजीवयन्जन्यायानोदिदिशोदक्षिणस्यां॥ तंचान्वधावद्द्रुभावनीलोमत्स्नाभिवर्षेणदुया
चितवाक्ययाले॥३०॥ यावंतमाशुभुविपातयतांचदैत्यःसमापतद्भूमितलेनिमग्नः॥ सपांसुव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षेशाकराग्र संस्थं प्राप्नोदय त्फलमंशां चाम्लत्वम् ॥३१॥ तस्मिंस्थले भूच्छिवलिंगमद्भुतं समर्चितं दे
वगणैः प्रहर्षितैः ॥ पराशरेणापि तदग्रतीर्थे देवैः कृते देवतीर्थाभिधाने ॥३२॥ चित्राख्यकेसत्सुर
तीव हृष्टाः दृष्ट्वार्च्य देवं नकुलेशनामकं ॥ स्वप्रजभूः पराशरो दशांगनासंगमपातकं मुनिः ॥
३३॥ देव्याहतः शूलवरेण तंजः प्राणात्ययेसांजलिरब्रवीच्छिवां ॥ ॥तंज उवाच॥ ॥ मन्नाम
कं देहि शमीवनं पुरं भवेन्महादेवि तथेति साब्रवीत् ॥ तदप्रभृत्येव हि तत्पुरं बभौ तंजापुराख्यं
प्रथितं तु चोले ॥३४॥ तथाष्टशक्तिर्निदधे ष्टदिक्षु समर्चितानां चोपसर्गोनिहंत्र्यः ॥ पुरस्य तस्यैव वन
णां च वासि पद्मन्सु तात्ताः प्रदर्दति लक्ष्मीं ॥३५॥ स नीलमेघोन्हरिस्तदावसत् शमीवनेशास्यसदे
वसन्निधौ ॥ मुनिवरनिकरैस्तदाविकाशाविहितानंदभरेण सुमेश्वतुष्टा ॥३६॥ अभितुष्टुविरे महेश
पत्नीं हारिण्याः स्तमुनयः सुरेगणेंद्रैः ॥ ॥सुरा ऊचुः ॥ ॥ धम्मिल्लकमल्लीं दिनिजार्तिभल्लीं हल्ली
प्रियां तां श्रुयशोमतल्लीं ॥ त्वांन्नोनुमः संस्तुतकामवल्लीमानंदवल्लीं विजयेशपत्नीं ॥३७॥ श
मीवनेशेणविजयप्रदेशो तंजेश्वरोभूत्स तदा महेशः ॥ देवैस्तुतो सो परिपूजितस्तदा मुनीश्वरै
स्तेश्वसुधाब्धिनीतटे ॥३८॥ प्रहृष्टचित्ताश्च यमुरिन्द्रविष्णु शमीवनस्थानवरात्तुरास्तदा ॥ स्था
नप्रभावंत्वभिवीक्ष्य हृष्टो लिंगप्रतिष्ठामकरोदृसिष्ठः ॥३९॥ तीर्थं च लिंगं च स्वनामतो मुनिः सिद्धः स्त
दा कौंकणनामकः स्वयं ॥ स कौंकणाख्येश्वरनामलिंगं प्रतिष्ठयन्सिद्धतीर्थस्य पश्चात् ॥४०॥ ना
रायणः शंकरनामलिंगं तद्दक्षिणे स्थापयति प्रहृष्टः ॥ स्कंदो वसाम्यत्रपुरस्य रक्षकः सुशक्तिहस्तोरि
पुनाशकः पुरे ॥४१॥ भ्रातापुरावै हृतपुष्पकोभ्यगात् धनाधिपो रावणेन नातिदुःखात् ॥ शमीवनेत
त्र समर्च्य शंकरं लेभे धनेशात्वमथादिशांपतिः ॥४२॥ स्कंद उवाच ॥ ॥स्थानं प्रसादजनर्के हिम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ हेश्वरस्यभुक्तिप्रदंमुक्तिदमेवनृणां॥चोलेश्वरंतत्रशिवालयंव्यधातउत्तुंगलिंगस्यचतीर्थतीरे॥
१८ ॥४३॥ गंगैवसाभूच्छिवलिंगसंगतःख्यातासदावैशिवगंगकेति॥ स्नानेनपानेनचपापनाशिनी
॥ ॥४४॥ प्राक्पश्चाधनार्थिपुरवरनिरतोतत्रपुण्योभवेत्तांलिंगानांभुविषट्कमुत्त
मोत्तमंसंदर्शनान्मुक्तिदं॥ सान्निध्याच्चमहेशितुःसुरूपयादेव्यानपातत्पुरेनित्यंसंस्तुवतांरमाय
शुसुतानंदनेधनंवांछितं॥४५॥ ॥इतिश्रीशिवरहस्येउग्राख्येउत्तरभागेतंजेश्वरवैभवोनाम
त्रयोदशोध्यायः॥१३॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ ॥ तत्प्राच्यांस्थानदशकं
नित्यंशंभोःप्रियंमुने॥ चोलेकवेरजापारतीरेषुसुरमानवैः॥१॥ मुनिभिःस्थापितान्येवलिंगानि
क्रमशःपुरा॥ समुन्नतश्रवेशाख्यकाश्यपारण्यशिवस्थलं॥२॥ यत्रश्रीदक्षिणामूर्तिरूपेणैवम
हेश्वरः॥मुनीनांज्ञानमानंदंसत्याख्यसमुपादिशत्॥३॥पातालेशाख्यकंस्थानंदेवीलंकारवल्लिका॥
यत्रपद्मजपद्माक्षौलिंगमूलादिलोकितौ॥४॥ तिरमेतापुरख्यक्षाल्लिंगालोकेनसत्तमं॥ नोश्चनु
ष्टुवतुस्तत्रसंजलिंविधिमाधवौ॥५॥ ॥विधिमाधवावूचतुः॥ ॥पातालेशमहेशशांकरवि
भोस्वामिन्नुमानाथमांदर्पोत्तवंडितचेतसैववसुमहालिंगादिमूलेक्ष्वकौ॥यातोस्वःकिलभ्रमिमलम
तुलंसप्राप्यपातालकंशुध्येमामवदेवदेवभगवन्आगस्कराचामव॥६॥ क्षमापयामासतुस्तत्रपाता
लेशंतुलोकपौ॥बिल्वारण्यंचतस्माच्यांअर्जुनोस्त्राण्यथापयत्॥७॥किरातरूपीभगवान्कोलर्थेयुध्य
तोस्तयोः॥प्रसन्नोभूत्महादेवस्तस्मैपांडुतनूभवे॥८॥ तत्प्रहारंस्वमूर्ध्नेवधत्तवानपरमेश्वरः॥दृष्ट्वा श्रीशिव
देवंपांडुसुतःनत्वाहृष्टाथतत्रवै॥९॥ अर्जुनउवाच॥ ॥वीरस्त्वंभगवनक्षमस्वदययामूर्ध्निप्रहा
रंहरस्वामिन्त्वत्पदयोर्ममास्तुसुदृढाभक्तिर्ममास्त्राणिभो॥ देहीशानदयानिधानदुरितात्मांसोच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यात्रप्रभो॥१०॥ तत्रप्रसादितो देवो ददौ पाशुपताभिधं॥ अर्जुनायास्त्रमदराद्देवदेवो महेश्वरः॥
११॥ तद्दक्षिणेनरस्थानं महेशस्य पुरातनं॥ दक्षिणद्वारकानाथस्तत्र सर्वेनदीतटे॥१२॥पूज
येद्राजगोपालरूपिणं चंद्रशेखरं॥ तुष्टावाभ्यर्च्य सत्वं नरस्थानेश्वरं हरिः॥१३॥ ॥राजगोपाल
उवाच॥ ॥नमस्तेरुद्रेशत्रिपुरहरशंभोत्रिनयन त्वदाधारं विश्वं भ्रमति नरतिर्यक्सुरगणं॥ अत
स्त्वां देवेशं निखिलनिगमांते सुविदितं स्वमात्मानं भ्रांत्याविविधमवयन्त्येहकलनाः॥१४॥ तवश्र
श्रावश्रावपदिभवतिभाश्ये नभक्तिचेत्तविभुश्रासिक्षेसाप्रभवतिसमक्षापिकुनरे॥ भवेपारावारे शि
वदगतसारे त्रिभुवने शरण्यापादाब्जं तव शिव विभो मेस्तु शरणं॥१५॥ इतिस्तुत्वावसद्विष्णुः चंप
कारण्यमध्यमे॥ तत्प्राच्यां पुंडरीकाख्यं स्थानं शंभोर्महाद्युतेः॥१६॥ पुंडरीकेश्वरस्तत्र पुंडरीकास्य
पूजितः॥ स्थानमस्ति ततः प्राच्यां काटकोटरसंज्ञितं॥१७॥ सिद्धेन पूजितो देवः काटकोटेन सं
स्तुतः॥ ॥काटकोटर उवाच॥ ॥दुःखाद्रिपाटनपटुधरकोभवाब्धौ लंकाटकोटभगवन्वट
मूलवास॥ तस्यैवं स्तुवतः शंभुः सिद्धिं मिक्षाय दत्तवान्॥१९॥ ततः प्राच्यां महत्स्थानं वेदारण्यं तु
पावनं॥ प्रागंबुधेस्तीरगतं नित्यं रम्यं भवांबुधे॥२०॥ वेदतीर्थे हि तत्रास्ति सागरे पापनाशनं॥ स्ना
तानां सर्वदा तत्र प्रीतो भवति शंकरः॥२१॥ मणिकर्ण्यभिधं तीर्थं शिरः स्नानात्सुपुण्यदं॥ शमी
द्रुमस्य मूले वै तपंति परमर्षयः॥२२॥ विश्वामित्रो गिराधोम्यः वसिष्ठो गस्त्य एव च॥ तत्राराध्य
महादेवं वेदारण्येश्वरं हरं॥२३॥ सिद्धिं मुक्तिं च ते प्रापुः शिवभक्ता महर्षयः॥ भस्मरुद्राक्षसंप
न्ना रुद्रपंचाक्षरादराः॥२४॥ कल्याणवेषं ददृशे कुंभजस्तत्र शंकरं॥ तुष्टाव परिपूज्यं तं भक्तिन
म्रकंधरः॥२५॥ ॥अगस्त्य उवाच॥ ॥वेदारण्ये यत्र शंभो शिव तव महिमा लिंगसंगत्यतां रं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ प्रालेयाचलकन्यकापरिलसद्वामांगसंगंहरः॥ हस्तेबालकुरंगधारकविभोअर्धेंदुगंगाधरवारंवारमपा
१९ रपुण्यफलदंदृष्ट्वाभितुष्टोस्म्यहं॥ त्वत्क्षेत्रेनिवसामिसोमहाकलात्कारमस्तप्रभो॥पादाब्जंशा
रणंतवास्तिममकिंप्राज्येनराज्येनवा॥कारुण्यार्णववेदवेधरहृदारण्यस्तुतोधावमां॥२७॥ ॥श्री
स्कंदउवाच॥ ॥इत्थंसश्रुतिकाननेनभगवतोलिंगंप्रतिष्ठापयत्॥ तत्रैवात्रकहोलनामकमुनि
र्लिंगंशिवस्यार्चयत्॥सिद्धाःकेचनमिश्रिमापुरवरेसिद्धाश्रमेदक्षिणेस्थानेवेदवनेश्वरस्यकृपयासं
पूर्णकामाभवन्॥२८॥ वेणुवादविदूषिणीभगवतीकैवल्यविश्राणिका॥पद्माभजितयामिकाश्रुति
सरोराराजिनिद्धासिका॥वेदारण्यमहेश्वरस्यरसिकामापत्नुमांभासिका॥२९॥ विघ्नानिनत्रवसतां
हरतिप्रसादात्तसीदज्जनाधतिपरोवसतीभवङ्कः॥पापंधुनोनिसकलंशिवभक्तिभाजांक्षेत्रोपस
र्गदनरानअथदुंकरोति॥३०॥ ॥इतिश्रीशिवरहस्येउपनाख्येसप्तमांशेउत्तरभागेशिवक्षेत्रवैभवे
वेदारण्यवर्णनेचतुर्दशोध्यायः॥१४॥ ॥श्रीउमायनमः॥ ॥स्कंदउवाच॥ जयेश्वरात्तथाप्रा
च्यांदिशिशंभोस्थलानिच॥ प्रागुत्तरेचमुनयस्तिष्ठंत्येवपदेपदे॥१॥ तेषुपुण्यानिवीवचिम्श्रणुध्वंमु
नयोगणाः॥श्रीमन्मत्तपुरस्थानेस्थानंपशुपतीश्वरं॥२॥ तदुत्तरेचसोमेशंमारुतेशंतुपुण्यदं॥त
त्प्राच्यांमारुकंस्थानंबालिनापरिपूजितं॥३॥ तत्राराध्येश्वरंवालीसप्तसागरलंघने॥भक्तिंप्रापे
श्वरंछायालिंगस्यैवप्रभावतः॥४॥तुष्टावेत्थंतथावालीकिष्किंधापतिरीश्वरं॥ ॥वालीउवाच॥
हेभर्गत्रिपुरांतकरिपोविश्वेशविश्वाधिकपाहिमांशिववानरंस्वदययाकारुण्यपूर्णेक्षण॥ तेनाहं श्रीशिव
बलवान्सदैवभवितावाल्येप्यहंवैभवः प्राकुजानामिहिवैभवोनरमतिर्धन्यःकृतार्थोभुवि॥५॥
इत्थंसंस्तुत्यकपिराट्अभवच्छिवभावितः॥ त्र्यक्षोदात्तपश्चिमेमुक्तिस्थानंतत्प्रीतिकृद्विभोः॥६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवराजेश्वरं प्राच्यां कावेर्या दक्षिणे तटे॥ देवराजः पुराहल्यासंगमोद्भूतपातकात्॥ ७॥ विमुक्त
स्तत्र संपूज्य भगवंतं पिनाकिनं॥ तुष्टाव वंससहस्राक्षमीक्षमनन्त्यक्षमीशानमव्ययं॥ ८॥ ॥देवेंद्र
उवाच॥ ॥ त्र्यक्षाक्षय्यफलप्रदोक्षवहनस्त्वमिन्द्रियेक्षप्रभो वीक्षाशिक्षितमन्मथांधकरिपो दक्षा
ध्वरे शिक्षक॥ कक्षार्णवसत्तेगरोत्थसुमहाज्वालादिभक्षाद्यते देवान्यालयनेसदा शिवसदा कर्त्रे सम
स्तेनमः॥ ९॥ स्तुवनस्तत्र देवेशो वैदेराजस्य पातकं॥ अहल्यासंगमानीतं नाशयामास शंकरः॥ १०॥
तत्प्राच्यां अष्टदशकं लिंगस्थानं विमुक्तिदं॥ तीर्थलिंगाकवेराणां पापभंगकरं नृणां॥ ११॥ राघवेणा
र्चितं लिंगं रामेश्वरसमाह्वयं॥ हनुमतार्चितं लिंगं देवर्षिगणपार्चितं॥ १२॥ देवेशानत्र लिंगेषु संस्तुन
श्वमहेश्वरः॥ ॥राघव उवाच॥ ॥शंभो पन्नगहार सन्मृगधर स्वामिन् त्रिनेत्रावमां॥ कैलासाचलवा
स शाश्वत विभो भर्क्तं हि मां पालय॥ १३॥ ॥हनुमानुवाच॥ ॥ शंकर पुरहर भर्ग भवांतक घोरतरां
तकं दर्पविनाशक सर्पपरिष्कृतचारुकलेवर॥ यक्षपतिस्तुत दक्षमखापह वीक्षणसिक्षितमन्मथ भो पाहि
विभो कमलापतिपूजितपद्मभवस्तुत देववदयापर परमेश्वर॥ चंद्रकलाधर शारधर हरहर हरपुरह
हरवेदशिरस्तुत पाहि सदाशिव देव नमस्ते॥ १४॥ ॥देवर्षय ऊचुः॥ ॥ कंदर्पदर्पशमनांतकसंप्र
हार चंद्रार्कवह्निनयनातुलविक्रमाढ्य॥ वेधोनमानरुसुहस्तविशाम्नकारुकोलोरुदभ्रकलितालक
तेनमस्ते॥ १५॥ तत्प्राच्यां क्षीरिणीशानं स्थानमस्ति चिरंतनं॥ क्षीरतीर्थं च तत्रास्ति शिवसायुज्य शिवप्रदं॥
॥ १६॥ तमाराध्यावसत्पश्चात्पापनाशाख्यको हरिः॥ तुष्टाव शं क्षीरिणीशं प्रांजलिः पापनाशकः॥
॥ १७॥ ॥पापनाशक उवाच॥ ॥शंभो त्वं गरकंधरः पशुपते वंदे स्तुतोसि प्रभो विश्वाशास्यदयां वि
धेहि भगवन् पाहि प्रभो मामव॥ पांडयशाप्यविमोचकोसि च मुनेः कोपानुभल्लकिनः पाहि त्वं धवल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिव र॰ ७ स्मितपशुपतेनित्यंनमस्तेनमः॥१८॥ नदार्य्यांमाधवीशोहिमाधवीगुल्ममध्यगः॥ क्षयिष्णुनांचसो
२० मेनतत्रसंपूजितोहरः॥१९॥ संपूज्यमाधवीशानंसोमःसोममभीष्टवत्॥ ॥सोमउवाच॥ ॥
हेसामिसीमास्तुनसामिसोममौलेउमाकांताविभोप्रसीद॥भूमासिभामार्धधृतार्गकासिभिषक्तमोसि
प्रभवोसितेनमः॥२०॥ तत्स्तुत्यानुष्टहृदयः नमरोभूमथाकरोत्॥कावेर्य्याउत्तरेतीरेसाक्षिनाथाभिधं
स्थलं॥२१॥ द्रोणेनाराधितस्तत्रपुत्रार्थंसाक्षिनायकः॥पूजितस्तुशिवस्तत्रददौपुत्रंधनुर्धरं॥२२॥
अश्वत्थामकनामानंस्तुतस्तत्रेश्वरोमुदा॥ ॥द्रोणउवाच॥ ॥शंभोजगत्साक्षित्रिलोचनाधवैद्योसि
भेद्योसिचसर्वगोसि॥पतिस्त्वमेवासिमहेश्वरोसिदेवादिदेवोसिसदानमस्ते॥२३॥ तत्पश्चात्त्रिदिवे
शारण्येदर्शनादिष्टकामदे॥स्मरणादेवसर्वेषांशिवसान्निध्यविशेषतः॥२४॥ प्रादात्याधायमुक्तिंचबि
ल्वपत्रार्चनाच्छिवः॥व्याधेनात्रास्थितोदेवनतस्मैविमुक्तिदः॥२५॥ ॥व्याधउवाच॥ ॥आ
व्याधिनेपशुपतेभगणेशचूडआव्याधिनेहरमहेशपिनाकपाणे॥पाहित्वमद्यभगवन्निगमांतवेद्य
आलाद्यसार्थभवसागरकर्णधार॥२६॥ ॥स्कंदउवाच॥ इत्थंस्थानवरेषुदेवमुनिभिःसंपूजितः
शंकरस्तेषांभक्तिमतांप्रसीदजनोद्धारकः॥पारावारभवोरुसागरपरिवारोरुवानेगिरिःदेवोभक्तिसुभा
षितांतरधरोविश्वेश्वरःपातुनः॥२७॥ ॥इतिश्रीशिवरहस्यउग्राख्येसप्तमांशेउत्तरभागेशिवक्षे
त्रवैभवोनामपंचदशोध्यायः॥१५॥ ॥श्रीउग्रायनमः॥ ॥स्कंदउवाच॥ क्षीरिणीवनमार्गेयांदे
वःकल्याणसुंदरः॥पुष्पेश्वरःपुष्पवनेपुष्पदंतेनपूजितः॥१॥ तस्मैतुष्टोमहादेवःप्रसन्नस्तत्रवै श्रीशिव
स्थले॥पुष्पेश्वरागेनेनैवस्तुतश्चैवप्रसादितः॥२॥ ॥पुष्पदंतउवाच॥ ॥नमस्तेनिवेष्याय
शर्वायपुण्यःप्रपूज्यायइज्यायविप्रैश्चसत्रैः॥महाशेषभूषायपूषेंदुवन्हिज्वलच्चारुनेत्रायपा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्थप्रियाय॥ ३॥ इत्थंपुष्पवनेशानः पुष्पदंतेनपूजितः॥ किंपुरुषाधिपत्यंपाथपक्षोचदत्तौदेवस्त्रि
लोचनः॥ ४॥ तत्प्राच्यांस्थाणुमुत्कंठंमुनिदेवार्चितंपुरा॥ कल्याणसुंदरेशाख्यंनाम्नादेवीचसुंदरीं॥
॥ ५॥ पुरासुघोरकल्पेवैमेरोश्चशिखरेगणाः॥ ईशानस्थायिकैलासेसहस्रशिखरैर्युतः॥ ६॥ दक्षि
णेतत्रभक्तानांशांभवानांनिवासिने॥ नारदोध्यापयेत्तत्रपातालाद्यमुनीश्वराः॥ ७॥ ईशानंदद्दशे
तत्रगणेश्वपरिवारितं॥ त्रिनेत्रंनीलकंठंचचंद्रापीडंवरदिक्पतिं॥ ८॥ भस्मत्रिपुंड्ररुद्राक्षमालाक
लितकंधरं॥ भुवस्थलागतेर्भक्तैः भस्मरुद्राक्षधारिभिः॥ शिवलिंगार्चकैः शैवैः शिवक्षेत्रनिवासिभिः
॥ रुद्रपंचाक्षरपरैः रुद्रलिंगानिरीक्षकैः॥ १०॥ प्रदोषसोमवारेषुभूतायामष्टमीषुच॥ शिवैकेकर्य
रुद्धिश्चब्रह्मक्षेत्रविशेषाधिजैः॥ ११॥ देहांतेशिवभक्तैर्वशिवलोकसमाहृये॥ मेरोर्दक्षिणकैलासेसहस्र
शिखरैर्युते॥ १२॥ समासीनंमुदेशानंशिवसर्वगणैर्युतं॥ शिवाज्ञयाभक्तपूजांकुर्वतोनारदोभ्यगात्॥
श्रीस्कंदउवाच॥ ॥ ईशानत्वंदिव्यतिथुभासिनित्यंशिवाज्ञया॥ शांभवानांपूजकोसिधन्यस्त्वंशिव
पूजकः॥ १४॥ ततोदक्षिणकैलासोमहाकैलाससंनिभः॥ सहस्रशिखरस्थानेदिव्यलिंगपरी
वृतः॥ १५॥ शिवसंपूजनादेवप्राप्तोसिसुमहत्पदं॥ उत्तराशापतिस्त्वंचधनदोनित्यतःस्वस्वा॥
॥ १६॥ एतादृशंमहद्भाग्यंदिव्यतीथुनदृश्यते॥ किंत्वेकंचित्रमुत्कृष्टंपातालस्यागतोस्म्यहं॥ १७॥
वासुनाचयमुनानित्यंस्पर्धतेनागराडयं॥ शेषोशेषफणींद्रेषुस्थितेषुभोक्तवान्वचः॥ मांदृष्ट्वा
ऽभ्यर्च्यहृष्टात्मामामुवाचसनागराट्॥ ॥ शेषउवाच॥ ॥ चिरेणागतोस्यत्रचिरायात्वं
हिनारदः॥ दृष्टंकिंवात्वयाश्चर्यंदेवलोकेषुसत्तम॥ १९॥ धन्यस्त्वंसर्वमित्रोसिनेदृशोमु
निसत्तम॥ किंत्वेकंहद्गतंमेद्यचिरायहृदिगोप्यते॥ २०॥ पातालेहाटकेशाचीप्रभावेनैव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिव-७ नारद॥पातालस्थायनः सर्वेभोगिनोभोगसंयुताः॥२१॥गणयामोवयंनैवदिवस्थानमरानपि॥फणासह
२१ स्रैर्देवेशंपश्यामिस्तौमिशंकरं॥२२॥मदंगंसांगभूषायैकल्पयामासशंकरः॥ममांगतल्पवैकुंठेशे
तेनंदायवैहरिः॥२३॥मत्पारणाभिभूतास्तेतुल्याःकिंमुसमीरणाः॥पंचाशत्कोटिपथियीनदनद्यादिसाग
राः॥२४॥सहस्रशिरसांमध्येएकसर्षपवत्स्थिताः॥शिवपादांबुजार्चातोईदृग्भाग्यंबलंमम॥२५॥
सखासीतिभयोक्तेतेप्रशंसानात्मनोचिता॥एवंरहस्यंमांवेदमुक्त्वान्वायुधिक्कृतिं॥२६॥एतदेवहि
पातालेदृष्टवानस्मिवाद्भुतं॥ ईशानसंमतितदाश्रुत्वानारदभाषितं॥२७॥वायुःकोपपरीतात्मानार
दंप्रत्यभाषत॥ ॥वायुरुवाच॥ ॥शेषएवबलीलोकेशिवपादांबुजार्चकः॥नान्योदेवेषुमुनिषु
गणेषुशिवसक्तधीः॥२८॥तत्कुक्षिपूरणायाहमहंयामिशिवाज्ञया॥शिवाज्ञयाजगत्सर्वंब्र
ह्मासृजतिपात्यपि॥विष्णुश्चात्रांतिमेकालेईशानोयंहरत्यपि॥इंद्रस्त्रिविष्टपंपातिविश्वस्यमरु
तांगणैः॥३०॥उदेतिभानुरिंदुश्चहव्यंवहतिपावकः॥दिशापालाःशिवाज्ञातोपालयंतिचराचरं॥
॥३१॥यमोयमयतेपापान्धर्माधर्मविचारयन्॥नदीनदावहंत्येवनोद्वेलंयांतिसागराः॥३२॥
श्रुतिस्मृत्युक्तकर्माणस्तपंतिपरमर्षयः॥ग्रहाश्चभगणैःसार्धंमेरुमैलिंभ्रमंत्यपि॥३३॥मनवःक
ल्पसंख्यानंकुर्वंत्येवशिवाज्ञया॥शिवाज्ञयैववसुधांधत्तेमोलीसनागराट्॥दृष्टंतस्यबलंलो
केकिमेकोधारयेज्जगत्॥कुलानस्ताधारयंतिधारयंतिचदिग्गजाः॥३५॥कूर्मोयंत्रिंशुमास्त्रवषेने श्रीशिव
नैकोप्यहेःपतिः॥अहंशिवाज्ञयासर्वाशरीरेचेष्टयाम्यहं॥३६॥दशभिःप्राणवर्गैश्चसर्वमेव
चराचरं॥शिवेनकल्पितंभोज्यंद्विपादःस्त्रिचतुष्पदं॥३७॥वयंसमीरणायामोसर्पाणामत्र
पारणं॥किंनोच्येनात्रवचसापर्शयतुबलमावयोः॥३८॥सागरंशोषयिष्यामिगिरीनुन्मूल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

याम्यहं ॥ पश्यंतु महद्बलं देवाः नारदाद्याश्चराचराः ॥ ५१ ॥ इमानि शिखराण्यद्य मेरोरुन्मूलयाम्यहं ॥
हित्वैकं देवदेवस्य महाकैलासमुन्नतं ॥ कुलाचलांश्च सोमूलानप्याप्ययाद्य नारद ॥ यमे दक्षिण
कैलासं सहस्रशिखरैर्युतं ॥ ५१ ॥ ईशानेनामुनावाधौ पातयामि द्रुतं बलात् ॥ ओजोवतीपुरस्थं वै
वसावोभिमपि पातये ॥ ५२ ॥ विष्णुलक्ष्म्यालार्ध्ययुक्तं सवैकुंठं प्रपातये ॥ आहूयतां स शेषोत्र दिरो
वं पश्यतां वयोः ॥ ५३ ॥ इत्युक्तमात्रे धार्यौ तु नारदो गाढ्रमालरु ॥ शेषाया क्रुधयपत्सर्वं वायुनोक्तं च
संसदि ॥ ५४ ॥ उरगाधिपतिः क्रोधात्यातालान्निरगात्तदा ॥ तुरगाधिपवेगेन तत्रागान्मेरुमस्तकं
॥ ५५ ॥ ईशानेनार्चितस्तस्थौ शिवांगवरभूषणः ॥ जिह्वाः संलेलिहन्ने त्रैदहन्वायुमभाषत ॥ ५६ ॥
॥ शेषउवाच ॥ किमुक्तमधुना वायो पश्य मद्रूपोरुषं ॥ एषदक्षिणकैलासः सहस्रशिखरैर्युक्तः ॥
॥ ५७ ॥ मेरुमध्यगमध्यस्थस्तत्पक्षे फणकैः स्वकैः ॥ ईर्ष्यया धारयाम्यद्य सोन्मुखं कुरुमाचिरं ॥ ५८ ॥
सगर्वयोस्तत्र सवायुशेषयोर्वैरेण लोका नयनीयभीतिं ॥ शांतिं च जेयुः क्षुभिनाम हर्षयः क्षुद्राच
लाः पेतुरपां ब्धिमध्ये ॥ ५९ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशोत्तरभागे षोडशोध्यायः ॥
॥ १६ ॥ ॥ श्रीउग्रायनमः ॥ ॥ श्रीस्कंदउवाच ॥ ॥ एवं दक्षिणकैलासशिखरं पातयस्व भो ॥ ई
श्वरो मुनिशेलं वा अद्योपातयसत्तम ॥ १ ॥ बलं प्रपश्यंतु सुराः मुनयस्त्वावयोर्द्वयोः ॥ इत्युक्त्वा स्व
फणाभिस्तं धर्षयामास भोगिराट् ॥ २ ॥ वायुर्दुर्धर्षबलनः सप्तभिः प्ररूपस्थितैः ॥ वायुभिः सहितो
त्पतं बलवीर्यमदाधिकः ॥ ३ ॥ देवगंधर्वमुनयः विस्मिताश्च चराचराः ॥ कुलाचलास्तदा चेलुः उल्लो
लाश्च तथाब्धयः ॥ ४ ॥ --------- बलवान्वायुनोधिकः ॥ माजगन्नाश भाभेतु शिवस्य च चरा
चरं ॥ ५ ॥ पराजयोस्मद्वचसा लोकानास्थिति हेतये ॥ जानीमे तबलं शेषवायोश्चैव सुराहृदि ॥ फणा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ त्रयमथोक्षस्यशिखराणांत्रयंतथा॥भवेत्सहर्षोवायुश्चलोकास्तिष्ठंतुसासुराः॥७॥वायोर्वैपक्ष
२२ पातेनभयात्किंमेपराजयः॥पराजयोरिपोरग्रेमरणादतिरिच्यते॥८॥पुनरूचुःसुराःसर्वेलोका
नांस्थितिहेतवे॥ ॥देवाऊचुः॥क्षमस्वाशेषमहत्त्वायोक्षांतिसाराहिसाधवः॥जगच्छरीरंशंभो
र्वैमाद्रुहस्त्वंमहेश्वरे॥विज्ञोवादीत्वाभक्तोसिवचोनःकर्तुमर्हसि॥१०॥ ॥स्कंदउवाच॥ ॥निशा
म्यशम्याकमुपुष्पमौलेर्भक्तस्यशेषःसुरवंदवाक्यान्॥जहर्षवायुश्चदशामथानेरुवाचरुक्षसंभ्रम
भंनिरीक्ष्य॥११॥ ॥शेषउवाच॥ ॥सुरासुराणांवचनान्मुनीनांलोकाभवंतुनिरुजस्तववीर्ये
मंत्र॥दृष्टंसुरैस्तत्कथितंश्रुतंचनेदृग्विकत्थंतिमहानुभावाः॥१२॥भवैकचित्ताःसुभृशंविरक्ताः
शांतामतिःस्याच्छिवनित्यसंगताः॥त्वंवाक्षवर्तीनविमोचसेकुक्षंत्वनेनमस्तेनपराजयोणवपि॥
॥१३॥सुरासुराणांवचनान्मुनीनांभीशानवाक्येनचहर्षितोस्म्यहं॥क्रोधात्सदावांनिवसंतिलोकाः
मौलित्रयंचोच्चफणंकरोमि॥१४॥फणात्रयंचोर्ध्वमुखंतदाकरोद्दुधावशृंगत्रयमाशुवायुः॥तत्सुंद
रत्वंचममाशनयासंतत्स्वामिशृंगोपशुपेशशृंगं॥१५॥तद्वायुनानीतमधःपपातसक्षापगातीरगा
नेत्रचोले॥सलिंगासंगोपुरमंटपाद्यंकैलासशृंगत्रयमाशुमग्नं॥१६॥शृंगद्वयंदक्षिणतीरसंस्थं
श्रीसुंदरेशःपशुपेशशृंगं॥मत्त्याभिशृंगंकिलसह्यजायाःमत्भूर्तियुक्ताशिवलिंगसंगवत्॥१७॥
तदुत्तरेसंपतितंकवेरजातटेजहर्षयत्तदेववायुः॥दिशःप्रशांताविरुजाभवत्प्रजाःपातालमूलप्र श्रीशिव
ययौसशेषः॥१८॥सुरेंद्रवृंदाःप्रययुस्त्रिविष्टपंमुदाप्रशंसंतिचभोगिराजं॥तदाप्रभृत्यत्रभुजंग
गानिकैलासशृंगाणिसलिंगकानि॥स्थस्थानिदृष्टानिसुपूजितानिनरैःसदांभोधिनतीनिसत्तमाः॥
॥१९॥ ॥इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेवायुशेषसंवादेसप्तदशोध्यायः॥१७॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीउग्रायनमः॥ ॥जैगीषव्य उवाच॥ ॥कुत्रदक्षिणकैलासेश्शंगाणपम्यपतन्भुवि॥कावेर्यादक्षिणे
तीरेउत्तरेकानिमेवद॥१॥ ॥स्कंद उवाच॥ ॥शृणुष्वजैगीषव्याद्यकैलासंदक्षिणातदा॥शृंगाणि
वायुनाभूमौनिनाशात्यंतवेगतः॥२॥ निपेतुर्धरणीपृष्ठेचोलेवैसह्यजातटे॥शृंगद्वयंदक्षिणेतुममशृं
गंतुचोत्तरे॥३॥ स्वामिशैलाख्यकंशृंगंसुंदरंपशुपाभिदं॥कल्याणसुंदरेशास्यलिंगंशृंगेणसंगतं॥
पुरमंटपमासाद्यगिरिसुंदरिकांबया॥ दृष्ट्वात्रभूमौपतितंकावेरीतीरवासिनः॥५॥ विस्मयेनयु
ताःसर्वेतत्रदेवैर्महर्षयः॥यत्रसुंदरेशागेनतीर्थतीरेमुदायुताः॥६॥ सप्तसागरसंज्ञेत्रमाघ्यांतत्रा
भिमज्जनं॥पापनाशकरेपुण्येशिवदृष्यावनीकृते॥७॥ केचिल्लिंगार्चकाःशांतास्त्रिकालंबिल्व
२ न्केचि पत्रकैः॥रुद्रजाप्यःपराःकेचित्पंचाक्षरारताः॥८॥ अग्निरित्यादिभिर्मंत्रैस्त्रिकालंभस्मधारिणः
॥ त्रियायुषेशामंत्रेण धृताश्चत्रिपुंड्रकाः॥९॥ कल्याणसुंदरेशानवीक्षकाश्चांबयासह॥नी
र्थेत्रिषवणंतत्रस्नायिनःसप्तजन्मसि॥१०॥ सुंदरेशांबिल्वदलैःसोमवारेप्रदोषके॥अष्टमीषु
चभूतासुशिवरात्र्यांसमर्चकाः॥ फलमूलाशनाःकेचिनेंभसांपारणेरताः॥विरताःसर्वभोगेभ्यो
शिवभक्ताःक्षमान्विताः॥१२॥ शिवनामपराविप्रास्तुष्टुवुःसुंदरेश्वरं॥ ॥मुनयऊचुः॥ ॥
शिवंनुमःसदाशिवंगिरिशाभौलिवासिनं॥अपर्णयाविहारिणंफणाधरेंद्रधारिणं॥सुशांबरां
कधारिणंगजेंद्रकृत्तिवासिनंमुनींद्रमुक्तिदायिनंसुसुंदरेशमंबया॥१३॥ नमस्तुमःसदाशिवं
कोटिजन्मविसजातिपुण्यकर्मसेविनांसुनर्यभस्ममात्रनःशुद्धिरमपूतदेहिनोमहेशलिंगपू
जिनांसुरुद्रमंत्रजीविनां॥ सुरुद्रनेत्रजाक्षपद्मजाद्यदृश्यमूलमौलिकं॥ उमाधवंरमाधवाक्षि
पंकजार्चितांघ्रिकं॥नमःस्तुमः॥ प्रसीदभोभजामसोमशेखरं॥अहस्करोक्षभास्वरंमहेश्वरंच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुंदरावनंगरादनंसुसेव्यमाननंदिनं॥ गिरीशाख्योमकेशमीशमाश्रुमाश्रयाश्रयामहे॥ नत्यंतिगा
यंतिसदामुनयोभक्तिभाविताः॥ दिशापतिश्चसंपतिंपतेः पशोःपतिंसभापतिंवयंनुमः॥१६॥
सदामुदाहृदाभिधाविधाविहीनमाश्रयामहे॥ एवंचस्तुवतांतेषांमुनीनांसुंदरेश्वरः॥१७॥ मुक्तिं
चप्रददौलिंगे स्वलिंगेसंगतःसदा॥ भ्रमराकृतयोभूत्वालिंगेतस्मिन्तिरोभवन्॥१८॥ हृत्वंप
नेघापिलिंगेत्रसुक्षीराणिसमंततः॥ प्रातस्नाम्रमयंविभातिसुमहालिंगारूणंसंगवेमध्याह्नेक
नकप्रभंमरकतंसायंपुनःपश्यतां॥ अपराह्णेकपिलप्रभंसायंतनेपश्यतांमुक्तिंदास्यतिशंकरोत्र
वसतांकल्याणभूभृद्धनु॥१९॥ देवीश्रीगिरिसुंदरीपतिरुमाकांतोत्रराशजनेनत्रैवसुंदरहरं
शिवलिंगसंपूज्यघटजोस्तुवतं॥ स्वनामलिंगंचसमुंदरेशंवेधांमुदादक्षिणतोभिपूज्य॥ ददर्शम
न्माशिवलिंगपश्चाच्छंभुंचकल्याणतनुंनयांबया॥२०॥ ॥अगस्त्यउवाच॥ ॥कल्याणसुंद
रमहेशपिनाकपाणेशंगाधरांतकरिपोप्रमथादिनाथ॥ पाहिप्रसीदपरिपालयशैलवामत्व
ल्लिंगपूजनरतिर्निवसामियात्र॥२१॥ ॥श्रीस्कंदउवाच॥ ॥इत्थंश्रीगिरिसुंदरीकुचतटीपा
टीरवक्षोंकितं चंद्रोत्तंसकिरीटिनंश्रुतिशिरः संवेद्यपादांबुजं॥ ध्यायंध्यायमुमांगसंगविलसल्लिं
गाधिपंसुंदरं॥ कल्याणाख्यकमद्भुतंचभजतांमुक्तिःकरस्थाभवेत्॥२२॥ ॥इतिश्रीशिवरहस्ये
उत्तरभागेसुंदरेश्वरवैभवोनामाष्टादशोध्यायः॥१८॥ ॥ ॥श्रीउमायनमः॥ ॥श्रीस्कंदउवाच॥
सुंदरेशालयात्तेष्यांस्वंगंपशुपतीश्वरं॥ पशुपाशविमोक्षायवसंतिचमहर्षयः॥१॥ अभक्षावायुभक्षाश्च श्रीशिव
फलपर्णांबुभोजिनः॥ अग्निरित्यादिभिर्मंत्रैस्त्र्यायुषश्चत्रिपुंड्रकाः॥२॥ रुद्राक्षभरणाःशैवाः रुद्रपंचा
क्षरादराः॥ शिवलिंगार्चनपराः स्तुवंतिपरमेश्वरं॥३॥ अंबाद्वययुतंदेवंत्र्यंबकंशशिशेखरं॥ तस्मिन्शृंगे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महालिंगं देवं पशुपतीश्वरं ॥४॥ अभ्यर्च्य नियमेनैव फलपत्रैः सुमैरपि ॥ ॥मुनय ऊचुः॥ ॥हरशिव
परमात्मन्देवदेव महेश उरगवरसुहार पाहि गंगाधरेश ॥ भवभवहर शंभो विश्वविश्वाधिकेश पुरहर हर
विमानं देवदेवाब्जपूज्य ॥५॥ कोसलेशो दशरथः संपूज्य पशुपेश्वरं ॥ अपुत्रः पुत्रलाभाय त्रिनेत्रं
तत्र शंकरं ॥६॥ तुष्टाव साश्रुलिं शंभुं भक्तियुक्तो नृपः शिवं ॥ ॥दशरथ उवाच॥ ॥ हस्तन्यस्तविधृताज
कं अंकसंस्थमगजामुखलोकं भक्तवृंदनिहतातुलशोकं त्वां प्रणोमि भगवन्मरमेकं ॥७॥ तस्मै पशुप
तीशानो ददौ पुत्रचतुष्टयं ॥ तदाप्रभृति येन त्वा देशोयं च प्रयोभुदा ॥८॥ तदुत्तरे तु पट्टीशं देवस्थानं तु पाप
हं ॥ तत्र संपूजयामास पट्टकाख्यो महामुनिः ॥९॥ तुष्टाव देवं पट्टीशं विश्वेशं चांबिकायुतं ॥ ॥पट्टक उवाच॥
॥हे देवदेव गरकंधर पाशनाश भूषांग पाहि हर शंकर व्योमकेश ॥ गंगाधरं तकरिपो पुरिपाहि दीनं देव
वत्वदीयपदपूजनतो निधन्यं ॥१०॥ पट्टिकः सिद्धिमापाय संपूज्यात्र महेश्वरं ॥ तदुत्तरे स्थानमेकं शिव
लिंगसमाह्वयं ॥११॥ देवी प्रीत्या तत्र स्थितमालिलिंगमहेश्वरं ॥ संपूज्य बिल्वैः कमलैः तुष्टाव शाङ्क
निं शिवं ॥१२॥ ॥देव्युवाच॥ कपर्दीगंगाधरचारुमौले कपालजालावृतकंधराद्य ॥ अभेद्यवेदे कृति
रोमवेद्य वेद्यादिमस्मांभगवन्नतोस्मि ॥१३॥ देव्यैवं संस्तुतस्तत्र स्वार्धांगं प्रददौ शिवः ॥ तदुत्तरे स्थानमे
कं दक्षिणावर्त्तसंज्ञकं ॥ आवर्त्ताभिमुखीतत्र सप्तजाविवरंगता ॥ लोकानामुपकाराय हेरंडं प्राविशद्वि
तं ॥१५॥ तत्र हेरंडकेशानं शिवलिंगं च संस्थितं ॥ तत्रेश्वरीधेनुकेशः वायुना पूज्य संस्तुतः ॥१६॥ ॥
वायुरुवाच॥ ॥ विधिहरिपूज्य महेश देव शंभो हिभूषापूषनेत्रभर्ग ॥ विविधागमसंस्तुताघदेवपा
दं नजहामो सोमभूसन ॥१७॥ तत्स्तुत्या तुष्टहृदयो वायोः मादात्सदागतिं ॥ तदगेत्नेश्वेत विघ्नेशः नम
तां विघ्ननाशकः ॥१८॥ पुरार्चितस्त्र्यंबकेनै त्रिपुरं हंतुमिच्छता ॥ इंद्रेण वृत्रयुधादौ विष्णुनादैत्यसं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 गरे॥१९॥ देवामहिषयुधादेपूजितश्चेतविघ्नपः॥संस्तुतोदेवमुनिभिर्यास्त्येनापिविघ्नपः॥२०॥सि
 द्धिबुध्दिसमुद्दाहतत्रभक्तेष्टकामदः॥ ॥पुरहरउवाच॥ ॥विघ्नपूगपरिभेदनसीलंकर्णतालचलि
नाचलमूलं॥ दैत्यवर्गहृदयानलशूलंविघ्नपंनमतदेवलमूलं॥२१॥ तत्रसंस्तुत्यविघ्नेशामजन्महद्रि
पून॥महादेवस्त्रिपुरहरश्चेनविघ्नेश्वरंतथा॥२२॥ इंद्रस्तुष्टावविघ्नेशंविघ्नस्यादेसमर्च्यच॥ ॥
इंद्रउवाच॥ गजाननंनोमिसदेवविघ्नपंविनाशनंकामितकामिदायिनं॥सनातनंदेवगणावनंस
दासदांतरंतंगणपंचपावनं॥२३॥ ॥श्रीविष्णुरुवाच॥ ॥विघ्ननिवारणवारणवक्त्रकारणतारण
हेतुजगतः॥वारणभूतसमीरणभूभधारणदेवसदाप्रणतोस्मि॥२४॥ ॥देव्युवाच॥ ॥इभाननंम
त्कुलभूतनंदनंचिरंतनंविघ्नपगणप्रशालनं॥ फलादनंशोकविनाशनंसतांस्त्वद्भक्तिभाजंहृदयेप्रण
म्यतो॥२५॥ ॥अगस्त्यउवाच॥ ॥सिपिधन्यसिपापवृंदंलोकंस्रजस्यवसिनोभवमेचारण्यः॥
कारुण्यपूर्णहृदयेभिसनातनोसित्वामाश्रयाभिसनतंवितनंदधस्व॥२६॥ ॥स्कंदउवाच॥ ॥
इत्थंनेगणनायकंश्रुतिशिरोवेद्यात्मकंतत्रवे॥ संपूज्यप्रमथाधिनाथसुमहालिंगंचदेवीमपि॥
॥विघ्नेशंनतकामदंप्रतिपदंसंपत्प्रदंशाश्वतं॥ श्वेतारण्यंकिलदक्षिणाद्रिनिमहस्थानेस्थितंवै
मुदा॥२७॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेशिवस्थानवैभवेनामएकोन
विंशोध्यायः॥१९॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ ॥तद्वैभवंतदाप्राहस्कंदःस्वा
मिगिरेस्तदा॥ जैगीषव्यायमुनयेपृच्छतेभक्तिपूर्वकं॥१॥ ॥मुनयऊचुः॥ ॥जैगीषव्येनमु
निनापृच्छसेतेनतत्रहि॥ सस्वामिशैलविभवंकथमुक्तंवदाधुना॥२॥ ॥सूतउवाच॥ ॥जैगीष
व्यस्तदाप्राहस्कंदंनरकनाशनं॥मुनिभिर्गणवंदेश्वतमापृच्छाचशोकारिं॥३॥ जैगीषव्यउवाच॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दक्षाद्रिशृंगेकैलासात्कावेर्याउत्तरेतटे॥ निपातितंवायुनेति त्वयोक्तंपूर्वमेवहि॥ ४॥ तद्वैभवंमम
ब्रूहिस्कंदभक्तस्यमेऽधुना॥ सहैभिर्मुनिभिर्देवैर्गणवृंदैश्चसत्तम॥ ५॥ जैगीषव्यवचःश्रुत्वातारका
रिरभाषत॥ ॥ स्कंदउवाच॥ ॥ मेरोर्मूर्ध्निस्थितेतत्रकैलासेदक्षिणेमम॥ शृंगसंगसमाभासमणि
गोपुरमंटपा॥ ६॥ मयूरराजप्राकंचमणिध्वजविराजितं॥ चंपकाशोकपूतीकंदेव्यापुण्यवनावृतं॥
॥ ७॥ मत्तकोकिलहंसालिमयूरखगशोभितं॥ शुकशारिकवादैश्चसुपंकजसरोवरैः॥ ८॥ संशोभ्य
मानंमणिभिःशृंगंशैव्याचलाभिधं॥ तत्रस्थानेनमत्पूजाकृतामन्मूर्त्तिमस्तकै॥ हस्ताग्रासिधरांमू
र्तिसोष्णीषंमणिकुंडलं॥ कक्षटकाक्रांतहस्ताग्रांकटिकांचीविराजितां॥ १०॥ सुवर्णोत्पलपत्रादि
हारधारिलकंधरां॥ पद्मपत्रेक्षणांदिव्यांबिंबाधरसुशोभितां॥ ११॥ पीनकौशेयवसनांसर्वांगालिप्त
चंदनां॥ संपूज्यवरिवस्याभिःसदैवहिसुरादिभिः॥ १२॥ धूपैर्दीपैश्चनैवेद्यैर्भक्ष्यैर्भोज्यैर्मनोहरैः॥ तां
बूलनीराजनकैःप्रणामैःप्रक्रमैस्तवैः॥ १३॥ स्तौतिस्मप्रांजलिर्मांहिईशानोमांचतत्रवै॥ ईशानउवा०
स्कंदानंदितदेववृंदनिवहाहस्तस्थशक्त्यासुराश्रापारसुतारकप्रहरणासिंहाश्वशक्त्यानमः॥ वल्लीप
ल्लक्रूभक्तशूलनिहतापारारिवृंदालकध्वांतापारविकारशूरभगवनशंभोःप्रियस्त्वंसुतः॥ १४॥
पुरासुरभयान्नीतास्तेदेवाईशंमहेश्वरं॥ प्रार्थयंतिमदुत्पत्तिंब्रह्मविष्ण्वादयःसुराः॥ १५॥ ततःकालेन
महतासमुत्पन्नोऽस्मिशांकरात्॥ षण्मुखःकृत्तिकास्तन्यरसेनापोषयन्नतं॥ १६॥ मांदेवाःसैन्य
निवहेसेनापत्येऽभ्यषेचयन्॥ मयाशक्तिधरेणैवतारकोनिहतोयुधि॥ १७॥ शूरोऽथसिंहवक्त्रश्चदैत्या
श्चान्येमहाबलाः॥ ववर्षुःकुसुमंदेवाःदुंदुभीश्चाप्यवादयन्॥ १८॥ ननृतुश्चाप्सरसांसंघागंधर्वा
श्चजगुःकलं॥ निहतेतारकेतत्रशूरेसिंहास्यकेरिपौ॥ १९॥ इंद्रःस्वकन्यकांमह्यमददाद्देवसेनकां॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 वल्लीपरिणताचापिप्रियंगुपरिपालिनी॥२०॥ तत्पित्रादाशनाथेनदत्तामद्यंस्वकन्यका॥ ध्वजश्चकौकु
 टोमेः धमधूरोवाहनंमम॥२१॥ दत्वाभवंतस्तेतत्रश्शूरस्तारकरगवच॥ पितरंदेवमीशानमपश्यं
गणसेवितं॥२२॥ मज्जनत्वामहादेव्याभणम्यशामयाब्रुवन्॥ शूरतारकसंहारंकन्याहृयपरीणयं
॥२३॥ एतस्मिन्नंतरेब्रह्मशिवसेवार्थमागतः॥ ओंधत्येनाब्रुवंतंचकिंत्वंवेत्सिचतुर्मुख॥ मदु
क्तंसत्वमाकर्ण्यशिवामुखमथाभ्यगात्॥ बध्वः कारागृहेक्षिप्तः इस्वामंत्रैःषितंहरः॥२५॥ मामा
हमुंचमुंचेतिब्रह्मणंवचनंमम॥ पितरंमांजलिरहमब्रुवंक्रमयंविधिः॥ २६॥ प्रणवार्थंविजा
नातिअर्थंपंचाक्षरस्यच॥ ओंक्षत्यगर्वसंवीलः त्वत्समीपमिहागतः॥२७॥ मद्वाक्यंतत्तनमाक
र्ण्यमामभाषतशंकरः॥ किंतेचिकीर्षितंस्कंदप्रणवार्थोत्रकोत्रवे॥२८॥ पंचाक्षरस्यवापुत्रमह्यं
त्वंब्रूहिकेवलं॥ शंभोर्वचनमाकर्ण्यतमहंतत्रचाब्रुवन्॥२९॥ शिष्यायवैनोविनायददामिप्रण
वार्थकं॥ नाशिष्यायवदामीशाददामीशप्रतिज्ञेयंममाधुना॥३०॥ देवोमदूचसातुष्टः प्रत्यभाषत
शंकरः॥ ॥श्रीईश्वरउवाच॥ ॥शिष्योहंभवतःस्वामिन्प्रणवार्थंवदाद्यमां॥ ॥श्रीस्कंदउवाच॥
॥तदाशिवेनसहितः श्रृंगेस्वाम्यभिधेमम॥ समागतोस्मिकैलासात्कैलासेदक्षिणेमम॥३२॥ तारक
ब्रह्मसंज्ञोसौलिंगरूपोमदग्रतः॥ शिष्यभावमगात्तत्रस्वामिशैलाख्यश्रृंगके॥३३॥ तस्मैमयाकथि
तेमेप्रणवार्थंमहत्तरं॥ पंचाक्षरेणसहितःशिवस्तत्राचंयच्चमां॥३४॥तुष्टावमांस्वामिनाथंनमामायोगु
रोर्गुरुः॥ हेस्वामिशैलवसतिर्वरशक्तिहस्ताशस्त्रासुरान्निवहाहवशोभ्यमानः॥ त्वांनोभिसोमशाक
लापरिपूर्णमौलिः त्वच्छैलमूलचलनांकनुदुःखलेशाः॥३५॥ ॥श्रीस्कंदउवाच॥ ॥इत्थंश्रीस्वामि
शैलप्रणवमनुमहावाक्यतात्पर्यकार्यंज्ञात्वाभूदतिनिश्चलात्मविभवः स्थाणुःपितामेमुने॥ तत्रैवेषु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलदाननिपुणेस्थानेवरेपावनेमामभ्यर्च्यनिवासिनंत्रिभुवनेसिद्धिंगताःसिद्धयः॥३६॥ ॥
इतिश्रीशिवरहस्येसप्तमांशेउग्राख्येउत्तरभागेस्वामिशैलवैभवेनामविंशोध्यायः॥२०॥ ॥ ॥
॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ ॥तत्स्वामिशैलप्राच्यांवैस्थानंकोटिश्वराभिधं॥कोटि
श्वरोमहेशानःहेरंडेनसमर्चितः॥ तुहुंडपुत्रोहेरंडोमुनीकोटीश्वरस्थले॥भस्मरुद्राक्षसंपन्नः
रुद्रपंचाक्षरादरः॥२॥ बिभ्रच्छ्मश्रुजटाःकुर्वन्ब्रह्मपुत्रोपत्नोभिनः॥कोटिश्वरंतत्रमुनिःत्रिवा
रंपूजयनस्थितः॥३॥ तुष्टुवेतत्रदेवेशंकोटीशानंशिवामपि॥ ॥हेरंडउवाच॥ ॥शंभोनमस्तेस्तु
महेश्वरायउग्रायभीमायचशंकराय॥मृत्युंजयायांधकसूदनायसनातनायायनमःपरस्मै॥४॥
तत्स्तुत्यातुष्टहृदयस्तस्मैमुक्तिंप्रदत्तवान्॥तदारभ्यमहास्थानंकावेर्यादक्षिणेतटे॥५॥कुंभ
घोणाभिधंपुण्यंपावनंमुक्तिदंपरं॥पूर्वमेकार्णवेजातेकल्पेतत्पुरुषव्हया॥६॥प्रलयंसचराच्छं
भुःजानुदघ्नेथसंगरे॥ऊर्ध्वलोकसमाकीर्णेतदंडार्णवत्लेपिते॥७॥दिगंबराजटामौलिःचंद्रां
कोनागभूषणः॥भूलंस्कंधेसमाधायभस्मपुंड्रादिसेवितः॥८॥धुन्वन्भ्रूलायतोधूतकुलाच
लगणंस्थिवः॥उच्चैर्घोषोमहादेवःसंचरन्सागरांभसि॥१०॥ददर्शकलशंतत्रविहितंसंप्लवे
स्थितं॥ब्रह्मणाअमृतंतस्मिन्क्षिप्तंसर्वांतकालके॥११॥कलशंप्रलयांतेत्रोम्लाग्रेणाहर
धरः॥तद्भिन्नंकलशंतत्रद्वीपेभून्यंतुदक्षिणे॥तद्भिन्नंकलशंतत्रतत्घोणंपूर्वतःपतत्॥त
ल्लिंगंघोणकेशाख्यंदृष्टंपापभयापहं॥१२॥तत्राभूल्लिंगमुत्कृष्टंदर्शनान्मोक्षदंपरं॥महापाप
हरंनृणांदर्शनार्चानतिस्तवैः॥१३॥कालांतरेस्यलिंगस्यराजायोध्याधिपोमुदा॥चकारशंभोः
कैंकर्यंगर्भगेहंतुगोपुरं॥१४॥मंगालांबापतेस्तस्यकुंभेशास्यतदापुरं॥संपूज्यराजाकुंभेशंमाधा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ तासंस्तुवन हरं॥१५॥ ॥मांधातोवाच॥ ॥नमस्तेस्तुकुंभीशाय त्रिनयनमहादेवभगवन्विभोशंभोदे
२६ वत्रिपुरहरविश्वाधिकविभो॥प्रभोभूतेशानप्रमथपसदामामवविभो॥१६॥ ततस्तुस्तुतस्तुष्टहृदय
स्तस्मैराज्यंप्रदत्तवान्॥ सोमेनाराधितस्तत्रकुंभेशास्तेनरस्थितः॥१७॥ कुंभेशात्रमहत्तीर्थं हेम
पुष्करसंज्ञकं॥ ततीरे पुण्यकाले षुस्नात्वा कावेरिपाथसि॥१८॥ दृष्ट्वाभ्यर्च्यचकुंभेशंदंभोपि
सुकृतांवरः॥ सरसस्तूत्थतःप्राच्यांसोमःसोमेश्वराभिधं॥१९॥संस्थाप्यपूजयामासतुष्टावैवंस
सोमराट्॥ ॥सोमउवाच॥ हेसोमसोमास्तुतदेवदेवविश्वेश्वरानंतजगत्प्रभोसिमहेशसोमेश्व
र पाहिमां॥विभोसोमेस्तिसत्यंहृदयप्रवृत्तिः॥तदाग्नेयांतुनागेशःपूजितोनागभूषणः॥तत्रैवन
टईशानउमाभाग्यःसभापतिः॥ पातालमूलादागत्यशेषोशेषाहिसंवृतः॥करोतिपूजनंतत्रना
गेशस्यचशेषराट्॥२३॥सहस्रवदनैस्तौतिदेवंनागेश्वरंहरं॥ ॥शेषउवाच॥ ॥ नमस्तेत्रिनेत्रि
णेत्रिपुरहरदक्षांतकहर प्रपद्येपादाब्जंतवहरविभोपापहरण॥ तवाचार्यासौभाग्यंप्रमथसुरविप्रादि
निवहान्नमन्येस्वल्पेपित्रिनयनविभोतवमहिमन्॥२४॥ सूर्योपिपूजयामासनागेशंतत्रशंकरं॥तु
ष्टावेशंसमभ्यर्च्यनागेशंपरमेश्वरं॥२५॥ ॥सूर्यउवाच॥ नागेशमीशंशरणंशरण्यंपरेण्यमु
क्तिप्रदव्योमकेशं॥ तमंबिकेशंचगणेशनाथंधूर्जटिंशशिमौलिंप्रणतोस्मिनित्यं॥२६॥ तस्याग्नेयां
महातीर्थंमघाख्यमघनाशनं॥ शिवतीर्थंमहत्पुण्यंसिंहसंस्थेबृहस्पतौ॥२७॥ स्वपापविनि
वृत्यर्थंगंगानदनदीगणैः॥कुंभयोगेमहामाघेमहापापनिबर्हणे॥२८॥ तीर्थेमहाकल्पत
रोस्थास्यतांमुक्तपःकरे॥तत्रस्नात्वातुलेकालेद्वादशांतमनागते॥२९॥ दृष्ट्वातत्रत्यलिंगानि श्रीशिव
कुंभीशानंप्रणम्यच॥पंचपातकनिर्मुक्तःशिवलोकेवसेच्चिरं॥३०॥ गंगाद्याःसकलानद्यःस्वपाप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विनिर्जितये ॥ मघारेष्यसरसिस्नात्वाकुंभीशानंप्रणम्यच ॥ ३१ ॥ सरस्याउत्तरेतस्याविश्वनाथं
प्रतिष्ठवत् ॥ अविमुक्तेश्वरंपश्चात्पूज्यलिंगद्वयंतदा ॥ ३२ ॥ संतुष्टुवुस्तदानघागंगाद्यास्तं
महेश्वरं ॥ गंगाचयमुनारेवातुंगभद्रासरस्वती ॥ विपाशाचैवकावेरीशरयूनित्यकन्यकाः ॥
तत्तीर्थतीरेनित्यंवैशिवंस्वर्चितकामदं ॥ ३४ ॥ ॥ गंगाद्याऊचुः ॥ ॥ हेविश्वनाथभगवन्
अविमुक्तवासभक्तैर्यवसेव्यभगवन्भवभीतिनाश ॥ पाहीशानप्रमथपसदाऽस्मदीयपापानि
लोकनिहितानिविनाशयस्व ॥ ३५ ॥ गौतमात्मरसःपश्चात्गौतमारण्यमितीश्वरं ॥ संपूज्य
स्तौतिदेवेशंमहेशंगौतमोमुनिः ॥ ३६ ॥ ॥ गौतमउवाच ॥ नमहरगंगाधरदेवदेवशंभोत्रिनय
नपाहिसहेशपिनाकधारिन् ॥ भवभयहरभुक्तिमुक्तिदायिन्विबुधगणार्चिततत्वांनतोस्मिनि
त्यं ॥ ३७ ॥ ब्रह्मासत्रपसत्येषुसमाधिस्थाकुंभघोणके ॥ स्तुवन्नभ्यर्च्यकुंभीशंतंदृष्ट्वास्थाणवेभ
वं ॥ ३८ ॥ ॥ ब्रह्मोवाच ॥ ॥ महेशप्रसीदभगवन्प्रतिसृष्टिमिच्छुर्नित्यंजरामरणसर्जनतोति
दुःखं ॥ हृल्लिंगसंगतदृशापरिपूर्णचित्तसंतापत्रिनिवहामिमहेश ॥ ३९ ॥ दैत्यानांहरणार्थे
चचक्रंदत्तंशिवेनहि ॥ विष्णवेविष्णुःसदाऽयंदैत्यैःसंपीडितोभ्यगात् ॥ ४० ॥ तपस्तप्तुंकुंभ
घोणेवैकुंठादागतोहरिः ॥ दैत्येभ्यःस्वस्यरक्षार्थेसह्यजातीरदक्षिणे ॥ ४१ ॥ चक्रंतत्रविनिक्षि
प्यत्र्यक्षदत्तंहरिस्तदा ॥ हेमाल्छाह्वसरःप्राच्यांसरयस्थोहरिर्मुदा ॥ ४२ ॥ शिवाज्ञयैवहेमारण्यह
रयेस्वांचकन्यकां ॥ तत्पाणिग्रहणंतत्रचकारशिवसंनिधौ ॥ ४३ ॥ चकारशार्ङ्गपाणिंतंसोमेशाश्च्यो
त्तरेतदा ॥ स्थानंप्रकल्पयामासतेनसंपूजितस्ततः ॥ ४४ ॥ ॥ शार्ङ्गपाणिरुवाच ॥ ॥ कुंभेशावि
श्वेशमहेशशंभोपाहिप्रसीदभगवन्नवमांप्रसीद ॥ त्वत्स्थानसंवासरतिस्तवार्चास्वच्छचित्ततनः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रभोधिकंमे॥ ४५॥ स्तुत्वावाच इत्थं तेनकुंभघोणेसकलादिविषदब्रह्मविष्णवादयोमुनिवरगणवृंदैः
सेवितेस्थानवर्ये॥ भस्माक्षादिविभूषणैः शिवमहादेवेचसंवादिभिः कुंभीशाननतिस्तुतीखुनि
रतैःस्थेयंमहीशस्थले॥ ४६॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेकुंभघोण
वैभवोनामएकविंशोध्यायः॥२१॥ ॥उग्रायनमः॥ ॥श्रीस्कंदउवाच॥ ॥हरिश्रितानदीती
रेदक्षिणेपापनाशनं॥कुंभघोणस्यनैर्ऋत्यांयमेनाराधितंस्थलं॥१॥ धाराख्यंनाममुत्कृष्टंलिं
गमेशावतेश्वरं॥ यमतीर्थंलदग्रतुदर्शेश्रावणजंतुयः॥२॥स्नात्वायमार्चितंलिंगंदृष्ट्वानेवक्षते
यमं॥ ॥यमउवाच॥ ॥ कालकालशिवशंकरशंभोपाहिमांनरकदुःखगमीश॥सर्वदेहिपरि
निंदितपापैःमामवप्रमथपाधमहेश॥ ३॥ श्रावणेदर्शकेस्नात्वामत्तीर्थेत्वांनमस्यतां॥ जनानां
नेवभीर्निर्वैभवतांत्वत्प्रसादतः॥४॥ तथेत्यनुमतः शंभुः महादेवोघृणानिधिः॥कुंभघोणेत
थाग्नेय्यांत्रिनागेश्वरमुत्तमं॥५॥ चंपकद्रुममूलेतुस्थितंनागेश्वराभिधं॥ कर्कोटकोघसार्धेत्रां
दक्षकःपूजयद्धरं॥६॥ तुष्टुवुस्तत्रतंनागास्त्रिनागेशंमहेश्वरं॥ ॥नागाऊचुः॥ ॥ नमस्ते
नागेशत्रिनयनभवापारजलधेः॥नरेदक्षध्वांक्षप्रतिहरणकारुण्यजलधे॥ तवांगासंगोत्था
प्राप्तिनमहापुण्यविभवाः इमेसर्वेनागाःआगिरिभिधामोदिमहह॥७॥ तस्याग्नेयभागेतु
तीर्थेचंडाभिधेश्वरे॥कार्तिकादित्यवारेषुस्नात्वानागेशमीक्ष्यच॥ ८॥ तचस्याहत्वानागा
नांप्रीत्यैत्नोस्त्यादिवघोमहान्॥कुंभकोणादथेशान्यांस्थानंभीमेश्वराभिधं॥९॥भीमपा
तकसंहारंहरंभीमेश्वराभिधं॥ संपूज्यभीमोभीमेशंभक्त्यातुष्टावभक्तितः॥१०॥ ॥भीमउवाच॥
नमस्तेभीमेप्रमथपमहादेवदयया मदीयास्यानांप्रहरणंशरणंयाघ्रिकमलारमानाथस्तुत्याप्रथि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नवरकीर्ते पशुपते॥ बलंबाधेमंप्रदीशारी भुंवस्यक्षयकरं बलंभप्रमथनार्चिता वलं लेपो ध्वजः
॥ नागाशुनानांसबलंभीमोभीमेश्वरोरिहा॥ तत्प्राच्यांकंपहारीशः प्रापकंपनिवारकः॥१३॥
चोलेनाराधितस्तत्र स्थानेपुण्यतमेपुरा॥ चोलोभ्यर्च्यामहेशानंकंपहारिश्वरस्तुवान्॥१४॥
॥चोलउवाच॥ ॥ हेकंपहारिन शशिखंडचूडधांपाशातोन्नादकसानुकंपा॥ कुरुष्वमत्तेभ
मगादिनासंननागहर प्रसीदमां॥१५॥ कावेर्यांउत्तरेतीरे स्थानेकर्कोटकेश्वरं॥ तत्रेंद्रः पूज
यामासबलेनपरिपीडितः॥१६॥ देहंकर्कोटकः प्राप्य तद्भक्तिपरितोषितः॥ स्वमूर्ध्निसुषिरं
द्रस्यस्थानेदेवोदहद्धरः॥१७॥ तुष्टावदेवदेवेशंस्वभक्त्यापाकशासनः॥ ॥इंद्रउवाच॥ ॥
शंभोकर्कटकेशपाहिदययामांदैत्यभीतंसदापाहीशानदयानिधानभगवन् देहिप्रतिस्थेप्य
सि॥ दैत्यानांनिधनायखंडपरशोविश्वेश्वराद्यावमां॥ १८॥ तदेंद्रायमुदाप्रादाद्वज्रंबलरिपो
र्वधे॥ ततः प्राच्यांमहादेवः शिवयोगीश्वराभिदा॥१९॥ शिवयोगीभस्मदिग्धः रुद्रपंचा
क्षरादराः॥ त्रिवारंतत्रतल्लिंगंसभार्योलरतोषयत्॥२०॥ तुष्टावशिवयोगीशंशिवयोगी
शभक्तिनः॥ शिवयोगीउवाच॥ नमोनमस्तेत्रिपुरांतकारेमहेशाकंदर्पमुदर्पहारिन्॥ प्रसी
दमुक्तिंवितराधमह्यंरूपानिधेमांशिवयोगमादिश॥२१॥ ततः प्रसन्नोभगवानअभवच्छि
वयोगिने॥ प्रददौशांभवंयोगंमुक्तिंतत्रप्रदत्तवान्॥२२॥ तत्प्राच्यांस्थानमीशस्यआद्यार्जु
नसमाह्वयं॥ सर्वपापप्रशामनंरामेशादिमुनिप्रियं॥२३॥ सह्यजोत्तरभागेतुपुराणंपावनं
परं॥ तत्रसंपूजयामासलोमशोऋषिसत्तमः॥२४॥ परिपूज्यादिमध्येशामर्जुनंपापतर्जनं॥
तुष्टुवेतत्रतल्लिंगंदेयासहसलोमशः॥२५॥ ॥लोमशउवाच॥ ॥पाहिप्रसीदमुमु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ स्वोभवपार्वतीशावेदार्थशार्वभगवन्भगनेत्रहारिन्॥ विश्वेश्वरालकविभोप्रमथाधिनाथचं
द्रोत्तमांगभगवन्भमदेहिमुक्तिं॥ २६॥ इत्थंसलोमशेनेशः संस्तुतस्तत्रशंकरः॥ प्रादान्मु
२८ क्तिंलोमशायव्योमकेशोमहेश्वरः॥ २७॥ ॥श्रीस्कंदउवाच॥ ॥इत्थंस्थानेषुशंभोर्येमनिय
मपराःभस्मरुद्राक्षहाराः रुद्राध्यायजपादराः श्रुतिशिरः पंचाक्षरेसादराः॥ संपूज्यप्रमथा
धिनाथमगजांनेश्वंतिल्लिंगार्चनात्सं प्रापुः परमोन्नतिं सुरवराःक्षेत्रेषुसंवासिनः॥ २९॥
इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेशिवक्षेत्रवैभवोनाम द्वाविंशोध्यायः॥ २२॥
॥ श्रीउग्रायनमः॥ ॥ श्रीस्कंदउवाच॥ ॥कावेर्यादक्षिणेतीरेस्थानंमध्यार्जुनाभिधं॥ मु
निभिर्देवगंधर्वैः सेवितंपरमंमहत्॥ १॥ वैखानसैर्वालखिल्यैर्विष्णुनाब्रह्मणापिच॥ सेवितं
मुक्तिदंपुंसांदर्शनादेवकेवलं॥ २॥ सर्वपापहरंपुंसांमहत्पुण्यफलप्रदं॥ तत्रैकरात्रवासेन
नभूयोगर्भमाविशेत्॥ ३॥ तत्रमात्राप्रदानेनमहादानफलंलभेत्॥ कारुण्यामृतनीपीरव्यंशि
वंदृक्पावनंमहत्॥ ४॥ स्नानात्त्रैलोक्यतीर्थेषयत्फलंतत्फलमालभेत्॥ पुण्येपुष्यर्क्षकेस्नात्वाका
वेर्यांशिवसंन्निधौ॥ ५॥ ब्रह्महापिविमुच्येतकिंपुनस्त्वन्यपातकी॥ देव्यातत्रतपस्तप्तंपुण्ये
र्जुनवनेपुरा॥ ६॥ अपर्णापर्णवसनात्पूर्णेसिद्धिप्रदेस्थले॥ भस्मरुद्राक्षभूषाढ्यारुद्रपंचा श्रीशिव
क्षरादरा॥ ७॥ शिवलिंगार्चनव्यग्रा अग्रविन्यस्तमानसा॥ ध्यायंतीहृदयांभोजेदेवदेवंम
हेश्वरं॥ ८॥ प्रसन्नास्यंत्रिनयनंचंद्रगंगाधरंहरं॥ भवंभीममथेशानंकालकालेचशंकरं॥ ९॥
वर्षाणांसाशतंतत्रध्यायंतीपरमेश्वरं॥ ध्यायंत्याश्चमहादेव्याहृदयांभोजमध्यतः॥ १०॥ प्रादु
र्भूतंमहालिंगंशिवस्यार्जुनमूलतः॥ लिंगमध्यार्जुनेशानंमहालिंगंमहत्त्वतः॥ ११॥ प्रादुर्भूतं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महालिंगंमहादेवीनिरीक्ष्यच ॥ उन्मील्यनयनेपश्यनविश्वेशंलिंगरूपिणं॥ १२॥ पंचामृतैः
पंचगव्यैः देवीपंचफलैरसैः॥ कवेरजापयःपूरैरभिषिच्यमहेश्वरं॥१३॥ गंधैर्दिव्यसुमालिप्यवस
नैर्भूषणैरपि॥ बिल्वपत्रैश्चकल्हारैःकरवीरार्कचंपकैः॥१४॥ मल्लिकामालतीभिश्चपूजया
मासपार्वती॥ धूपैर्दीपैश्चनैवेद्यैस्तांबूलैःफलमंडलैः॥१५॥ नीराजनैः प्रणतिभिःप्रदक्षिण
पुरःसरं॥ तुष्टावेशंमहालिंगरूपिणंपरमेश्वरं॥१६॥ महालिंगंमहादेवंब्रह्मविष्ण्वादिसेवितं॥
॥श्रीदेव्युवाच॥ ॥जयजयसर्वसुरासुरवंदितानंदितविबुधावनगणवंदजयजयवेदशिरवा
स्तुतशंकरपापमधःकुरुदुःखमपंजयजयपाहिसदा॥१७॥ शिवविद्रुतरुद्रदरिद्रमपाकुरुमेज
यजयहेपरमेश्वरसंस्तुतमनारदवीर्यवादभूलधर॥ जयजयगांगतरंगमहेंदुजभातततुंगकपर्द
विराजितमोस्तु॥ पाहिविभोपरमेश्वरमामवदेवदयाकरसर्वगत॥१८॥ इत्थंदेव्यास्तुतःशंभुर्महा
लिंगाकृतिःशिवः॥ तत्स्तुत्यातुष्टहृदयः तामुवाचमहेश्वरः॥१९॥ ॥श्रीईश्वरउवाच॥ ॥त्वत्स्तु
त्यातुष्टहृदयोमहालिंगाकृतिस्त्वहं॥ अत्रैवार्जुनमूलेतुसंवसाम्यर्जुनेश्वरः॥२०॥ अत्रैववस
तांपुंसांभक्तानांमुक्तिदोस्म्यहं॥ प्रदोषेसोमवारेषुतथाभूताष्टमीषु॥२१॥ पर्वकालेशुभांवीक्ष्यस्ना
त्वावैसह्यजांभसि॥ तस्यानंतंभवेत्पुण्यंमुक्तिस्तस्यकरेस्थिता॥२२॥ इत्युक्त्वांतर्दधेलिंगेदेव्यास
हमहेश्वरः॥ आज्ञागणपतिर्नाम्नातत्रसंपूजयद्धरं॥२३॥ महालिंगाकृतिंशंभुंभव्यंमध्यार्जुनेपु
रा॥ स्वश्मुंडाकर्षितनदीसांगरांभोभिरीश्वरं॥२४॥ दिव्योद्यानगतैःपुष्पैर्विल्वैरभ्यार्चयत्तदा॥ध
नपुंड्राक्षमालाढ्यः गणेशस्तत्रशंकरं॥२५॥ धूपैर्दीपैस्तथागंधैर्नैवेद्यैर्विविधैरपि॥ नीराजने
र्नतीभिश्चप्रदक्षिणपुरःसरं॥२६॥ तुष्टावबंहितरवःकर्णौविस्तार्यशंकरं॥ ॥श्रीगणेशउवाच॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मध्यार्जुनेश हर शंकर स्वामि सोम गंगोत्तमांगधनसर्पमहोरुहारा ॥ सिद्धिप्रदोत्र वसतां च सुभक्ति
भाजामभीष्टविमुक्तिमथतां प्रथययाद्य शंभो ॥२७॥ सुरासुराद्यर्चितपादपद्मं वंदे मुकुंदाक्षिसरोजपू
ज्यं ॥ पुराभिदं केशरमंबिकाशं पश्येमहालिंगमिदं मनोज्ञं ॥२८॥ ब्रह्मेंद्रनारायणवेदमंत्रस्तुतं द
धीचिकण्वात्रिजलोमशार्चितं ॥ अगस्त्यमुख्यैर्मुनिभिः समर्चितं वंदे महालिंगमिदं मनोज्ञं ॥२९॥
स्कंदोप्यहं तत्र वसामि शंभोपद्माक्षविष्ण्वादिसुरैः समेतः ॥ तत्स्थानदेहं प्रवणांश्च मर्त्यान्हित
स्वशक्त्या हि शिवस्य चाज्ञया ॥३०॥ ॥श्रीस्कंद उवाच॥ ॥यस्त्वेव शास्यगणेश्वरः सितरुचिः स्वाश्य
द्रिनाथगुहः ॥ चंडेशोपि च शंभुपुराधिपतिः श्रीचित्तनभेशो नरः ॥३१॥ काश्यारण्यगतस्य दक्षिः मुक्तः
मुक्तिं तथा नायको नागेशो वटतीर्थगो विजयते मध्यार्जुनाधीश्वरः ॥३२॥ ॥इति श्रीशिवरहस्ये
उग्राख्ये सप्तमांशे उत्तरार्धे मध्यार्जुनवैभवो नाम त्रयोविंशोध्यायः ॥२३॥ ॥श्रीउग्राय नमः॥
॥ श्रीस्कंद उवाच॥ ॥ तदीशान्ये महेशास्य स्थानं श्रीमंगलारूपं ॥ प्राणेश्वरस्तत्र लिंगं महादेव्या
समन्वितं ॥१॥ पंचप्राणार्चितं पुण्यं दर्शनादिष्टकामदं ॥ गुप्तगंगाह्वयं तीर्थं पापनाशसमाह्वयं ॥
॥२॥ शिवालये स्थितं पुण्यं महापापविशोधकं ॥ श्रीमत्प्राणेश्वरं तत्र पंचप्राणाश्च तुष्टुवुः ॥३॥ प्रा-
णाः ऊचुः ॥ मातंगकृत्तिवसनानलसोमसूर्यपालानलाकलितमन्मथभस्मभूषा ॥ योबार्धकाय
भवभूषण मोन मस्ते सोमोत्तमांगगरादहड्डिपजांबरेण्या ॥४॥ इत्थं प्राणाः संस्तुवंति प्राणेशं चांबया
सह ॥ सूर्योपि नियसं तत्र स्तौति देवं महेश्वरं ॥५॥ संपूज्यादित्यदेवो वै स्नात्वा सह्याद्रिजाजले ॥ ॥
सूर्य उवाच॥ ॥हे कालकालानलफालमूल हस्तत्रिशूलकलिनाजकपालमाल ॥ हलाहलालंकृत
कंठभागव्यालांगभूष शिव पाहि विभो महेश ॥६॥ इत्थं सूर्यः शिवं स्तौति महेशासुरभीतितः ॥ ततः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राच्यां स्थानमस्त्येकं त्रिकोटीश्वरसंज्ञितं॥८॥ त्रिकोटिमुनिभिस्तत्र भस्मरुद्राक्षधारिभिः॥
संस्तुतः पूजितः शंभुः त्रिकोटेशोंबिकयुतः॥ ९॥ तपसा रुद्रजाप्येन पंचाक्षरजपेन च॥ ॥
मुनय ऊचुः॥ ॥नमस्ते त्रिकोटिशंशगाटीकृतनागाकरोटीलसन्मालिकेंद्राकिरीटिन्॥ भवद्दूरह
योरिकामतस्त्वं न यपारखरारिटिवदन्यान्नमन्यामहे देवसंघान्॥९॥ भवद्भक्तिमेकां भवांभोधिनौ
कां समारुह्य यामो यमं त जे यामः॥ न वेशान लोकं सदा वै विशोकं विमुक्ता विरक्ताः न वेक्षामुमुक्षः
॥१०॥ त्रिकोटिस्थानवासेन कावेर्यास्नानमात्रतः॥ त्रिकोटीशानतीस्तुत्या मुनयः प्रापुरीश्वरं॥ आम्र
तीर्थाभिधं स्थानं शंकरस्य चिरंतनं॥१२॥ तत्राराध्य महेशानं आम्रेशं पार्वतीयुतं॥ तीर्थे स्नात्वाथ
कावेर्यां मूकोवाक्पतितामगात्॥१३॥ द्विजः हेमतनुमूकत्वात् दुंधमूकोर्च्य संस्तवीत॥ आम्रेशानं भक्ति
युक्तः नित्यं पं चाक्षरं जपन्॥१४॥ त्रिकालमर्चयन्देवं आम्रेशं तत्र शंकरं॥ ॥दुंधुमूक उवाच॥
॥आम्रेशमंबायुतदेववर्गनिसर्गसंरक्षणदीक्षणेक्षणं॥ नमामि ते पादयुगाब्जमादरात् शंभो वरेण्यम
मतच्छरण्यं॥ १५॥ एवमाम्रवनेशानं दुंधुमूको मुनिः स्तुवीत॥ तदीशान्यां कंसपुरं स्थानं शंभोर्विमु
क्तिदं॥ दर्शनात्स्मरणाद्वासात् कावेर्या मुत्तरे तटे॥ आग्नीश्वरं तत्र लिंगं पापेंधनदवानलं॥ १७॥ त
त्राग्निः पूजयामास स्वनाम्नालिंगमीश्वरं॥ संपूज्यापर्णयायुक्तं भक्तिसक्तेन चेतसा॥१८॥ संस्तुवी
तिप्रहृष्टात्मा हव्यवाहो महोक्षगं॥ ॥अग्निरुवाच॥ ॥नमस्ते देवाय त्रिपुरसुरनाशाय भवते भव
त्वात्मालोकेन घकुलभयातापवयते॥ मुनींद्रेशाश्वद्भिर्जितजयरदुःखाच्च भवतेनिमग्नं मामग्निं भव
जलधिमग्नीश्वर विभो॥ २०॥ अग्निं च सर्वभक्षत्वपापात्पक्षेत्रमोचयेत्॥ प्रागग्मा वार्जुननाथस्य बा
णाराधितमुत्तमं॥ २१॥ स्थानं बाणेश्वराख्यं तत् सर्वेषां भोगमोक्षदं॥ बलिपुत्रो बाणनामा तत्राभ्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 र्यांस्तवीश्वरं॥ २२॥ बाणेश्वरं महादेवं संपूज्य परया मुदा॥ ॥ बाण उवाच॥ ॥ हरि बाण महेशा
 देव शंभो भगणाधीश महोत्तमांग बंधन गणं परिपूज्य बाण शंभुं गणयेनाहमिहाद्य तान्सुरौघा
न॥ २३॥ बाणाय प्रददौ स्तुत्या बलं बाहोर्बलः शिवः॥ मध्यार्जुनाद्दक्षिणे च स्थाने तिलपुरी निच॥
॥२४॥ मरुद्भिः पूजितं लिंगं दृष्टं पापभयापहं॥ प्रछन्ने स्नेन तल्लिंगमभ्यंग कारयेत्तु यः॥२५॥ शिव
लोकमवाप्नोति स्वयं ध्येयसहस्रं करे॥ ॥ श्रीस्कंद उवाच॥ ॥ स्तुवंति मरुतस्तत्र पूजयित्वा महेश्वरं॥
देवं तिलपुरीशानं भक्तिनम्रास्त्मकंधराः॥ २६॥ ॥ मरुत ऊचुः॥ ॥ हे देवदेव गरकंधर पापनाश
पाहीश देव दयया शिव व्योमकेश॥ वागीशमाधव विमृग्यपदाब्जमौले काकोदराभरणचरणौ शर
णं प्रपन्नाः॥२७॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे शिवस्थानवैभवे चतुर्वि
शोऽध्यायः॥ २४॥ ॥ श्री उग्राय नमः॥ ॥ श्रीस्कंद उवाच॥ तद्दक्षिणे तु दुर्गायं दुर्गया परिपूजितं॥
स्थानं शंभोः प्रियकरं पापसंघविभेदनं॥ १॥ तत्र दुर्गा भगवती पूजयामास शंकरं॥ हरिश्रुता नदी
तीरे स्थाने तत्र सुधावने॥ २॥ संपूज्य दुर्गा तुष्टाव दुर्गां दुर्गार्तिहारिणं॥ नमो भर्गाय सर्गस्थितिग
तिनिसर्गांतकरण नमो दुर्गेशाय प्रथितनयशासे पन्नगभृते॥ नमो भक्ताध्यानप्रहरणच- णायाद्य मह
से नमो वेदवेद्य प्रकटतररूपाय निधये॥ ३॥ इत्थं स्तुत्वा तदा दुर्गा विजित्तो सौ तदासुरान्॥ कुंभद्वा
रा प्रतीच्यां तु स्थानं पापविवर्जितं॥४॥ तत्र विष्णुः समाराध्य देवदेवं महेश्वरं॥ समारण्ये संस्तुते वि
ष्णुस्तत्र तुष्टाव शंकरं॥५॥ ॥ विष्णुरुवाच॥ ॥ हे देवदेव करुणाकर देव शंभो वंधो विभो करुण
यापरिपाहि देव॥ विश्वाधिकप्रमथितं त्वां तक विश्वनाय वेदांतवेद्य भगवन् हर शंकराद्य॥ ६॥ तदु
त्तरे श्रीनिवासः कृत्तिवासार्चने रतः॥ उपास्य तत्र वै लिंगमाराध्य हरिमीश्वरं॥ ७॥ हरिरुवाच॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पंचास्यपंन्नगधरान्ययदेवशंभोहेमांगकार्मुकविभोदयपाघदशाप्रपन्नय॥ विश्वंभराधरणहारमम
प्रसीदसुदजनोद्धरणकारणतोनमस्ते॥ ८॥ तत्प्राच्यांगोपदंस्थानंकावेर्याउत्तरेतटे॥ वृषभेनार्चितः
तत्रसंस्तुतःपरमेश्वरः॥९॥ ॥वृषभउवाच॥ ॥महेशाविश्वेशदयानिधानप्रसीदगंगाधरदेवशंक
र॥ तत्संन्निधौतवसदाशिवलिंगदृष्टिःसम्यक्फलद्रुमतलेममनुज्ञोनिषण्णः॥ १०॥ नदीशा
न्यांवटस्थानंवसतांशिवभक्तिदं॥ कावेर्याउत्तरेतीरेवटेशान्यांमहत्स्थलं॥११॥ तत्रसंपूज्यदेवेशं
मुनियोभक्तिभाविताः॥भस्मरुद्राक्ष त्रिपुंड्र रुद्राक्षरुद्रपंचाक्षरादराः॥१२॥ तुष्टुवुर्मुनयस्तत्रव
टारण्येश्वरंशिवं॥ ॥मुनयऊचुः॥ ॥नमोवेदांतवेद्यंसकलजगदाधारंधात्रावनरंहरंचिरोदारंप्रम
थपतिगंगाधरविभुं॥ हरंवारंवारंनिखिलश्रुतिसारंभयहरं॥महोदारंधीरंभवजलधिपारंपरतरं
॥१३॥ इत्थंस्तुत्वावटाधीशंमुक्तिमापुर्मुनीश्वराः॥ तत्प्राच्यांद्रुहिणस्थानंपश्चिमाभिमुखंमहत्॥
॥१४॥ तत्संन्निधौमहेशस्यकावेर्युत्तरवाहिनी॥ वेदीश्वरोमहादेवः पूजितोद्रुहिणस्तुतः॥१५॥
तत्रवासंधुनिस्थानेरोचयंतिमुनीश्वराः॥ ॥ब्रह्मोवाच॥ ॥नमस्तेवेदांतस्तुतमहितपादांबुज
विभोयतोमधुंवेदानदिशान्निहरगंगाधरविभोअहोवेदवेदीश्वरमदुमुकुलकुंचांबाधिपहरप्र
सीदह्यागोमेहरहरपुरारेघभगावन्॥१६॥ ॥इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभा
गेशिवस्थानवैभवोनामपंचविंशोध्यायः॥२५॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ ॥
हरिश्रुतानदीतीर्थनानागुणसमन्वितं॥ स्थाणुप्रियतरंसाक्षात्वसतांभुक्तिमुक्तिदं॥ १॥ श्रीवां
छितेजनस्थानंअग्राशांपुत्रशोकदं॥शिमाधुरंमहेशस्यप्रीतिदंपरमेशितुः॥२॥ कावेर्यादक्षिणे
तीरेस्थानपंचकमुत्तमं॥मुक्तद्वारंफुल्लवनंतालेशंकंतुकेश्वरं॥ ३ ॥आदिशास्थानमतुलंवसतांभु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिव र॰ ७ क्तिमुक्तिदं॥ ~~श्रीबांछितेजनमव्यावं~~ तत्राऽग्नीशांतु बाणेन समर्चितमनुत्तमं॥ ४॥ पंचलिंगैःप
रिवृतं नेतुं चस्वपुरं ततः॥ सोन्मूलयितुमुद्युक्तो बाणो ग्नीऽशालयं महत्॥५॥ अशक्तं बाहुसाहस्रै बो
३१ णोग्नीशामथास्तुवन्॥ ॥बाणउवाच॥ ॥ सद्योजातमहेशाशंकरविभो श्रीवामदेवाव मां तुष्ये
त्वाहमहेशशाश्वतहराघोरेशाइशानमां॥ ६॥ तत्राग्नीशं च संस्तुत्य जगाम स्वःपुरं ततः॥ पुत्रशा
कमदेशानं तत्र कं कालरूपिणं॥ ७॥ पुत्रशाकं यथा चेशो स्तेन तुष्टोप्यथास्तुवन्॥ ॥भक्तउवाच॥ ॥
नमस्ते कंकाल त्रिपुरदलनावत्रिनयन प्रसीदेशान संधर्नोविधुजकर्पूरधवल॥ प्रसन्नः पुत्रं मे प्रदि
शभगवन्नंतकरिपो भवद्भक्त्या मुक्तिं शिवदशिवलोकं गमयमां॥ ८॥ तत्स्तुत्या तुष्टहृदयस्तस्मै पुत्रं म
नंदिशत्॥ त्रिमाधुरेशां देवेशं अग्नशां करमर्चयेयत्॥ ९॥ कलाकलः कालकंठं कलाइमौलिभास्वरं॥
अस्थावितत्र देवेशं वैभक्तस्तत्र कलाकलः॥ १०॥ ॥कलाभउवाच॥ कालकालगरलाशानशं
भो चंद्रशेखर हराव्ययपाहि॥ विश्वनाथ मम नाथनमस्ते मन्मथांतकविभो परपाहि॥ ११॥ देवः
कालकलस्तुत्या तुष्टोष्टतनुरीश्वरः॥ तस्मै दक्षिणकैलासवासं प्रादान्महेश्वरः॥ १२॥ मुक्तद्वारे
पुरहरं समभ्यर्च्यास्तुवं छिवं॥ मुल्लो नाम मुनिर्भक्तस्तत्र शंकरमीश्वरं॥ १३॥ ॥मुल्लउवाच॥
नमः प्रफुल्लोत्पलपद्ममालाधरायभूध्रक्वरवासिने ते॥ पादांबुजं तेभिसमर्चयामि त्वद्भक्ति
युक्तोनिवसाम्यहं स्थले॥ १४॥ तत्स्तुत्या तुष्टहृदयो मुक्तिं मुल्लायादाच्छिवः॥ तत्प्राच्यां फुल्लवि
पिनं शंभोः पापापहं महत्॥ १५॥ फुल्लो नाम मुनिस्तत्र पूजयामास शंकरं॥ सर्वदा सर्वदशि श्रीशिव
वकभूतभूशं शांको क्षाविभो ज्वलितपुरनाशाव भवन्॥ अनंगंगोभूतोभक्तिस्त्रिदेहावनवि
भोव भक्त्याभक्तोहं न हि मममनो मुक्तिः विषयं॥ १५॥ तत्स्तुत्या तोषितस्तत्र मुक्तिं मुल्लायदत्तवा

त्र॥ आधिस्थानं तथा प्राच्यां आधिना पूजितो हरः॥१६॥ मुनिनारुद्र जाप्येन सतु देवो महेश्वरः॥ ॥
आधिरुवाच॥ ॥ नमस्ते हे रुद्र धनंजय सुवाहोधर नर प्रसीद त्वागो मेहर हर पुरांनाशकविभो॥ गरं
कंठे धत्से गदयुत चिकित्सा जननं भिषग्वर्योधुर्ये त्रिदशमकरीरं जितपदः॥१७॥ तस्मै मुक्तिं द
दौ तत्र आधये चाधयेश्वरः॥ आदिमायूरसंज्ञं तु तत्प्राच्यां विष्णुनार्चितं॥१८॥ तस्मै मुक्तिं ददौ तत्र
आधये चाधयेश्वरः॥ स्थानं तद्दृष्ट्वा हस्य वक्षदं पापनाशनं॥ तत्र सह्यापगातीरे चोत्तरे पूज्य शंकरं
विष्णुस्तुष्टाव भक्त्येशं तत्रसन्नो वसत्स्वरिः॥२०॥ ॥ हरिरुवाच॥ नमो देव वेदाश्च हे षेकवेद्य महा
शेष विषदास्त्वमेव॥ अणियांस्त्वनंतः स्थानवासं वसेरुर्निवासं त्वहं श्रीनिवासः॥२१॥ ॥इ
तिश्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे शिवस्थानवैभवो नाम षड्विंशोऽध्यायः॥२६॥ श्री
उग्रायनमः॥ ॥ श्रीस्कंदायनमः॥ स्कंद उवाच॥ ॥ कावेर्या दक्षिणे तीरे स्थानं ब्रह्मवना
भिधं॥ पावनं परमं तत्र पापानां परिशोधकं॥१॥ पुरा कैलासशिखरादागतेन शिवेन हि॥ लिं
गं महत्तरं तत्र दर्शनान्मोक्षदं नृणां॥२॥ मध्ये कवेरजातोये च बंधमोरुतिं हरः॥ प्राच्यां पश्चात्र
कावेर्या स्नातानां सर्वकामदं॥३॥ देव आकल्प्यया मास स्नातानामघनाशनं॥ ग्रहणे सोमसूर्या
यैपर्वकालेषु नित्यकं॥४॥ स्नात्वा कवेरकातोये च तीर्थं महेश्वरं॥ दृष्ट्वा ब्रह्मवनाधीशं मुच्यते
महतोंहसः॥५॥ प्रजापतिश्च सत्यादौ रुद्रैः प्रीत्यर्थमीश्वरं॥ स्थाप्य ब्रह्मवनीनाथं संपूज्य स्तो
ति भक्तितः॥६॥ ॥श्रीब्रह्मोवाच॥ ॥ यमस्करं महेश्वरं पराभिधं च शंकरं॥ भजामि सोमशेख
रं प्रपंचसिद्धये हरं॥७॥ नमामि पार्वतीपतिं सुरासुरौघसंस्तुतं॥ भवोद्भवं शिवाधवं रमाधवार्चितां
घ्रिकं॥८॥ अहस्कराक्षं शिवदं महोक्षगं दक्षाघशिक्षापरतंत्रमोक्षं॥ नमामि देवं भजतां विमुक्ति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दंस्त्वानेत्रसंवासिजनेकपावनं॥९॥ इत्थं ब्रह्मवनाधीशोऽस्तु षिकृत्वं ददौ विधेः॥ ससर्ज सविधिस्तत्र
जगदेतद्यथापुरा॥१०॥ देवासुराप्सरोयक्षांस्त्रिर्यग्ग्रामं चशांकरोत्॥ लब्ध्वा प्रसादं तत्थ्यानेः प्रा
कारंगोपुरं व्यधात्॥ ११॥ ततः कालेन महता कैलासे पूजयद्भवं॥ गौरीमयूरीभूत्वा नृत्यंस्यं चक्रे शि
वाग्रगा॥ १२॥ रवपि छमारे देवे शांविजयंतीपुवास्थिता॥ हर्षेण भूतलं प्राप्य स्नात्वा तीर्थे वयाव्
ये॥ १३॥ मरुद्वृधा मध्यतोयेसर्वे पापावनी सदा॥ धृतत्रिपुंड्ररुद्राक्षा दृष्ट्वा ब्रह्मवनेश्वरं॥ १४॥
वत्यातदग्र तस्तीर्थं ब्रह्मणा च कृतं पुरा॥ सर्वपापहरं तत्र गत्वा हीत्वां भोर्चयहरं॥ १५॥ बिल्वपत्रैः पंक
जैर्ध्वधूपदीपनिवेदनैः॥ नीराजनैर्नमस्कारप्रदक्षिणपुरस्सरं॥ १६॥ मायूरीन्नृत्यतीगौरीब्रह्मेशा
नंप्रतुष्टुवे॥ ॥गौरीउवाच॥ ॥ हरहरदेवदयाकर कुरु कुरु वरकरुणां शशिमौलि॥ भवभवभय
हरशिवतरगरभरकंठविभो॥ १७॥ प्रणतजनावन देव सुपावन नाम परात्पर देव विभो॥ पद्मज
पद्मविलोचनपूजितवेददचक्रदपाहि सदा॥ १८॥ भक्तविमुक्तिदभक्तविरक्तजनांतरसक्तसदावरद
विभो॥ हरगरलाशनवह्निविलोचनदयगमनोभवभस्मविदिग्धशरीरविभो॥ १९॥ परिपालयभू
लवरायुधनागविभूषणसोमविधारकदेवविभो॥ मयिकुरु देवदयामुदपापभयापहविश्वविनो
दविधानकरांतमहेशा॥ २०॥ इत्थं ब्रह्मवने देव्या संस्तुतः प्राहतामुमां॥ प्रसादसुमुखो भुत्वा देवः
पंचमुखस्तदा॥ २१॥ ॥ श्री ईश्वर उवाच॥ ॥ यस्मान्मलोभयं देवि मणीषेध्याभयांबिका॥ ना
म्नाचैवोत्तरेभागेमेवसन्नभियाहृशा॥ २२॥ जनानामत्रवसतां कावेर्यास्सुशुलेमम॥ लिंगंभावभ
क्तानांत्वमभयं प्रदिशाघवः॥ २३॥ गौरिमयूरिकाभूत्वायस्मान्धूर्जितिनवत्यमि॥ गौरीमायूरसंज्ञंतु क्षे
त्रंभूयादिदंमम॥ २४॥ दर्शनाद्यविवासाच्च क्षेत्रेशंभोः प्रसादकृत्॥ प्राक्पश्चात्षण्मुखेभास्योद्दे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्ररक्षाकरौममः ॥ २५ ॥ वसनामत्रमायूरेभक्तानांमुक्तिरेवहि ॥ इत्युक्त्वाब्रह्मविपिनेधीशोमायूरनाय
कः ॥ २६ ॥ अभवोभवसेवात्रदेवीतत्राभयांबिका । जनानांवसतामत्रपापेभ्योप्यभयंशिवा ॥ २७ ॥ प्र
दिशतिविमुक्तिंचमायूरेशप्रसादतः ॥ नाथशर्मानवद्यारव्यलिंगेतत्रसमर्चयन ॥ २८ ॥ तौचतुष्टुवतु
स्तत्रस्थानेतस्मिनशिवद्वयं ॥ नाथानवद्याभ्यांनमस्तेदेवायप्रमथपतयेनंतविभवेमहेशायाद्यायप्रथि
तयज्ञांसेदेवभवते ॥ सदात्र्युक्षावीक्षप्रविचालितपापाचलगणांगुणास्तव्येनेशातवनगणयावाःसुर
वरान ॥ २९ ॥ इत्थंतत्राद्यानवद्यामुनिगणविनुतौनाथशर्मस्तुतौसौ । देवौभक्तवरार्थंमुक्तिमतुलांप्रा
दाद्दणांभोनिधिः ॥ मायूरेत्रनिमज्जतांजनिमतांलिंगंचसंवीक्षतांपुण्येषुप्रथितेषुपर्वसुतुलासंस्थे
रवौवानिशं ॥ ३० ॥ कावेरीप्रथितोरुपाथसिरवेतीर्थेशिवस्याद्दराद्दक्पूतेविततेमहाघजनगाहृता
पनाशंकरः ॥ ३१ ॥ देवःशंकरएवतत्रवसतांमुक्तिंददात्यादराद्देवाशिवस्यलोकमथवैस्था
नेचसंव्यंचतेः ॥ ३२ ॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेगौरीमायूरवैभवेसप्तविंशो
ध्यायः ॥ २७ ॥ ॥ श्रीउग्रायनमः ॥ ॥ श्रीस्कंदउवाच ॥ ॥ जितमुक्तिप्रदास्थानंश्रीवांछीपुण्यवर्ध
नं ॥ पापंचनाशमाप्नोतिकृतपुण्यंविवर्धते ॥ १ ॥ तत्रपंचाक्षरंकर्णेसतारंप्रदिशेद्गुरः ॥ वसतांतत्स्थ
लेदेवःमरणावसरेमुने ॥ २ ॥ भैरवोपिचतत्रास्तेनिर्यापारोयशिक्षतुं ॥ दंडंपुरोनिधायेवध्यायन्ना
स्तेमहेश्वरः ॥ ३ ॥ आनंदभैरवोनाम्नाश्रीवांछीक्षेत्ररक्षकः ॥ शिवक्षेत्रमतानांतुनयमोयमकिंकराः ॥
॥ ४ ॥ प्रहर्षयंतिचनरान्पापानपिदिशोभितः ॥ तेषुपापिषुशिक्षायैभैरवःसन्नियोजितः ॥ ५ ॥ शिवेन
सर्वक्षेत्रेषुकाश्यांश्रीकालभैरवः ॥ तस्मात्काश्यधिकंक्षेत्रंनात्रभैरवयातना ॥ ६ ॥ श्रीवांछीशप्रसादेन
पापनाशोक्षणमिह ॥ कुर्वतांपुण्यजालंहिविवर्धतेपदेपदे ॥ ७ ॥ शिवंस्ताहंविनाकाशीनाशंयातिच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पातकं॥ तस्माद्यापारहितुः समासीनोत्रभैरवः॥ ९॥ श्रीवांछीशोत्तरे तीर्थं गुप्तं गंगाख्यमुत्तमं॥
गंगाद्याः सकलानद्यः तीर्थसन्निहिताः सह॥ ९॥ तत्रस्नात्वानरोदृष्ट्वाश्रीवांछीशं विमुक्तिभाक्॥ श्रियं
वांछन्हरिः पूर्वंतपसातोष्यशंकरं॥ १०॥ श्रियंलभेवरांविष्णुर्दैत्यानांचवशंगतं॥ तथाश्रीवांछनाथं
वै समभ्यर्च्यास्तुवन्हरिः॥ ११॥ ॥विष्णुरुवाच॥ ॥ जयदेवमहेशशंकरत्रिदशानामवनात्रमेश्रा
रण्यगरधारिन॥ भगणाधिपमौलेसमंतामममंगलांबिकापते॥ १२॥ इत्थंस्तुवन्महेशानंश्रीवांछीशं
श्रियः पतिः॥ श्रीमंगकेश्रियः पाणिमग्रहीछंकेरधिनः॥ १३॥ तत्रैवसंन्निधौशंभोः श्मशानन्नित्यदीपितं॥
तज्ज्वालाप्रभयाशंभोः नीराजनविधिर्भवेत॥ १४॥ तत्रसंवसतांपुंसांदेहांतेपरमेश्वरः॥ सव्येतरेंतः श्र
वणेदद्यात्पंचाक्षरंमनुं॥ १५॥ तेनमुक्तोभवेदेवनसभूयोभवेभवेत॥ तदीशान्यांतेजिनीशंविष्णुनाप
रिपूजितं॥ १६॥ स्थाणुंनत्वावरंशंभोर्भुक्तिमुक्तिप्रदायकं॥ विष्णुराराध्यतत्रैवचक्रंलेभेसुदर्शनं॥ १६॥
तेजनीशप्रसादेनदैत्यदानवदर्पहं॥ ध्वस्ताकरंसरः कृत्वात्रिवेणीसंगमेहरिः॥ १७॥ आहूतावानुका
वेरीहरिः शंभ्वभिषेचने॥ हरिश्चसेतितत्राशागान्मुखैनैकेनसह्यजा॥ १८॥ तस्यांस्तुत्यंचतच्छंभोः तेजि
नीशाभिषचने॥ चकारपंचगव्येनहरिः पंचफलीरसैः॥ १९॥ गंधैः पुष्पैश्चवासोभिः बिल्वमंदारकांबु
जैः॥ धूपैर्दीपैश्चनैवेद्यैः प्रदक्षिणनतिस्तवैः॥ २०॥ तुष्टावतेजिनीनाथंहरिस्तंपुण्यसौरभिः॥ ॥विष्णु
रुवाच॥ ॥ जयजयदेवविभोकपर्दीशाजन्द्विजराजसुगंगोत्तुंगमौले॥ धतचलकुरंगतुरंगवेद
वनसारण्यवतेनमोस्तुतेजिनीश॥ २१॥ इत्थंतस्तुनिहृष्टात्मातस्मैचक्रंसुदर्शनं॥ ददौसहरयेतत
त्रसनेत्रंबुजपूजनात्॥ २२॥ तेनदैत्यानजथावाजौलिंगेविष्णुःशिवार्चनात्॥ कात्यायनीपरिणयं
तत्रचक्रेमहेश्वरः॥ २३॥ पुरूरवामहेशस्यचक्रेकैंकर्यमद्भुतं॥ प्राकारंगोपुरंशंभोः तस्मैमुक्तिमदाछि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वः ॥२४॥ पुरूरवाः प्रनुष्टाव देवं श्रीतेंजिनीश्वरं ॥ आकाशवास भगवन अवमां च महेश्वरः ॥२५॥
श्रीव्योमकेश भव भूतपते पिनाकिन् नाकप्रियांतक विनायक पूज्यपाद वेदस्तुताद्य भगवन्निह वेतंजि
नीश ॥२६॥ शिबिस्तत्रार्चयामास तेंजिनीशं महेश्वरं ॥ भक्त्या परमया युक्तो स्तौति देवं स भूपतिः ॥२७॥
शिबिरुवाच ॥ ॥ गंगाधरांतक रिपो प्रमथाधिनाथ विश्वाद्य वस्थिति विनाशन कामनाश ॥ पाहीश
मां करुणयाध तसामिसोम श्रीतेंजिनीश गरभत्स ततं नमस्ते ॥ २८ ॥ श्रीस्कंद उवाच ॥ ॥ इत्थं तेंते
जिनीशं हरिनृपतिवशः पूजयित्वाथ नत्वा सर्वं स्वं काममयाद्भुतं मुनिनृपतिजना लेभिरे तत्र वै ॥ तस्मा
त्स्थानवरं निषेव्य मगजाकांतप्रियं सादरं वारंवारमनुस्मरन्नपि हृदा मुक्तो थ भक्तो भवेत ॥२९॥ ॥
इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे श्रीवांछीतें जिनीश्वर वैभववर्णनं विंशोऽध्यायः ॥२०॥
॥ श्रीउग्राय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ कावेर्या उत्तरे तीरे श्रीमत्तालवनं महत् ॥ स्थानं शंभोः प्रि
यकरं भवभक्तिविवर्धनं ॥१॥ कावेरी पुण्यसलिलैर्यो भिषिच्य महेश्वरं ॥ श्रीमत्तालवनेशानं क्षीरस्नाना
दिकं द्भवेत ॥२॥ सद्यः पापहरं स्थानं सद्योजातप्रियं सदा ॥ मुनिभिश्च सुरैश्चैव संसेवितं सर्वकामदं ॥
३॥ भूलोके तालनाथस्य लिंगस्य सदृशं नहि ॥ देव्या स्कंदेभवक्त्राभ्यां सेवितं पुण्यवर्धनं ॥४॥ तत्र पू
र्वं नपश्चक्रे तालकेतुर्नृपोत्तमः ॥ वर्षत्रयं शिवं ध्यायन् भस्मरुद्राक्षभूषणः ॥५॥ रुद्रपंचाक्षरपर
स्त्रिवारं शंकरार्चकः ॥ तत्र तालवने शस्य प्राकारं गोपुरं विधात् ॥६॥ मंटपादीनि शंभोः सप्तस्तत्रं वं
चाप्यचाकरत ॥ पंचामृताभिषेकैश्च गंधैर्बिल्वैश्च पंकजैः ॥७॥ अभ्यर्च्य यत्नथेशानं तालनाथं न
पोत्तमः ॥ अस्तुवत्सांबमीशानं श्रीमत्तालवनेश्वरं ॥ ८ ॥ तालकेतुः भक्तिपरस्तस्मिन्स्थाने नृपोत्तमः ॥
॥ तालकेतुरुवाच ॥ ॥ नमस्ते देवाय त्रिपुरदलनायांतकभिदे जगत्पात्रे हंत्रे असुरवधकर्त्रे च विभवे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वि॰

श्रीशिवर॰७ नमस्तेतालाप्यगरलभक्षायमहतेनवप्राचीनोऽहंन हि शिवंमुक्तिंचगणये ॥९॥ अगण्यंमेचाघंहरहरकृ
३४ पासागरविभो शरण्यस्त्वंशंभो सकलदिविषन्मौलिकिनमिलः ॥ त्वदस्यामन्मीले जगदुदयनाशास्थ
विहिताः विभोकल्पेविधिहरिहरादेवमणिनः ॥१०॥ इत्थंतत्रमहादेवस्तालेशस्तालकेतुना ॥ पूजि
तः परयाभक्त्या स्थानेतस्मिन्महेश्वरः ॥ ११ ॥ प्रीत्यातेराज्यमददात्प्रणामापद्दतंशिवः ॥ विमुक्तिमप्य
थांतेवरदोतस्मैमहेश्वरः ॥१२॥ तत्प्राप्यांकंतुकंस्थानेस्थाणुप्रियकरंसदा ॥ देवःपशुपतीशान० ॥
देव्यास्कंदेभयत्नाभ्यां कर्तुंभक्तिंधनंव्यधात् ॥ एकाम्रमूलेकावेर्याउत्तरेतोपतत्तच ॥१४॥ तल्लिंगमुदभू
द्भौमश्रीमत्पशुपतीश्वरं ॥ देवीतु द्राक्द धनत्रस्त कंतुकमुदीश्यच ॥१५॥ लिंगंपशुपतीशाख्यमविर्भू
तंतदांबिका ॥ प्रहृष्य हृदयेनेयंतत्रसंपूज्यशंकरं ॥१६॥ दध्नाक्षीरेणमधुनासितयासर्पिषाशिवं ॥ क
दलीनारिकेलाम्रजंबीरैःफलसैस्तदा ॥१७॥ गंधोदकैःसकर्पूरैःपाटलागरुमिश्रितैः ॥ सद्यजाता
पगानीरैःशिवतीर्थजलैरपि ॥१८॥ भस्मरुद्राक्षभूषाढ्यरुद्रसूक्तैरसेचयत् ॥ देवंपशुपतीशानंगंधैरा
लिप्यवाससा ॥१९॥ रत्नाभरणपूज्येनबिल्वमंदारपंकजैः ॥ पूजयत्परयाभक्त्यासादेवीवत्सरत्रयं ॥२०॥
फलैर्जलैश्चनैवेद्यैःनीराजननतिस्तवैः ॥ तत्रस्थानेपशुपतीशानमीशानमीश्वरं ॥२१॥ तुष्टावप्र
णतादेवीप्रणवाद्यघमीश्वरं ॥ ॥श्रीदेव्युवाच॥ ॥ हेकुंतकेशांतकदर्पनाशासर्पांगहारभगवन्ध
नसामिसोम ॥ कामांगनाशपशुपाशविनाशकेशस्वामिन्विभोपशुपतेसततंनमस्ते ॥२२॥ उद्दंडदंडध श्रीशिव
रखंडनखंडपर्शो आखंडलादिविबुधानतपादशंभो ॥ पाहिप्रभोपशुपतेप्रदिशात्रभक्तिंमुक्तिंनवात्र
वसतांकिलस्थानवर्ये ॥२३॥ इत्थंपशुपतीशानःदेव्यासंप्रार्थितस्तदा ॥ ओमित्युच्चारयन्देव्यानत्र
लिंगेतिरोदधे ॥२४॥ ॥श्रीस्कंदउवाच॥ ॥ श्रीमत्कंतुकसंज्ञकंपुरमुमाकांतप्रियंशांकरैः संसेव्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पशुपाशामुक्तिदमहो॰ देव्यापुरापूजितं॥ देवं तत्पशुं नाशनपरं संसेवितं पापभिन्नोजन्माभूत अथां
तकाद्भयंभगोप्नयातत्रवै॥२५॥ ॥ इति श्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेशिवक्षेत्रवर्ण
नेनाम एकोनत्रिंशोध्यायः॥ २९॥ ॥श्रीउमायनमः॥ ॥श्रीस्कंदउवाच॥ ॥ स्थानान्मायूरसंज्ञ
स्यप्राच्यांधर्मेश्वरस्थलं॥धर्मेणतत्र देवेशाः पूजितस्तत्रशंकरः॥१॥ संस्तुतः श्रीमहादेवः स्वराज्यप्राप्त
येपुरा॥ तदाधर्मपुरंनामधर्मेशस्तत्रशंकरः॥२॥ धर्मे जातः सुतस्तत्रपूजयामास शंकरं॥ तुष्टावलत्रदे
वेशंभवंभक्तिसमन्वितः॥३॥ धर्मउवाच॥ ॥नमस्तेधर्मेशात्रिभुवनधराधारभगवन् विभो गंगासंगो
ध्धतशशिजटस्त्वत्कपहर॥प्रसीदत्वंमेघागरधरहरापारकरुणांकुरुस्वाधेज्ञानप्रबलबरुमाधेहि
मधिवे॥४॥ इत्थंधर्मपुरेशंभुःपूजितोधर्मजेनहि॥ जन्मेजयंददौतस्यधर्मेशःकौरवेष्वपि॥५॥ततः
प्राच्यांज्वरहरोज्वरेणाभ्यर्चितःपुरा॥तत्रज्वर हरेशानस्तस्मैवरमदात्पुरा॥६॥ ॥ज्वरउवाच॥ ॥
नमोनमस्तेशशिखंडचूड प्रसीददेवेशपिनाकपाणे॥ त्वद्भक्तिभाजांवसतामथात्रज्वरोस्म्यहंविज्वर
तांकरोमि॥ ७॥ इत्थंज्वरहरेशानंसमभ्यर्च्यज्वरोब्रवीत्॥तत्प्रतीच्यांशिवस्थानंश्रीमदापत्सहाय
कं॥ ८॥भक्तापन्नाशकंदेवंगंगातुंगजटाधरं॥मुनिनाजानुकर्णेनसंस्तुतंपापनाशनं॥९॥आपत्प्रह
रणंतीर्थेशिवाज्ञेयंनिवारकं॥ तस्मिन्स्नात्वानरोदेवंपश्यत्यापत्सहायकं॥१०॥ जातुकर्णस्तवेनेशंसंस्तु
वंस्तापाद्विमोचितः॥ ॥ जातुकर्णउवाच॥ ॥आपत्सहायशिवदेवउमासहायशंभोप्रसीदपरि
दग्धअनंगकायकं॥ भक्ताघपापहरणार्त्तिनिवारकायसोमायतेभगवतेसततंनमस्ते॥११॥ जातुकर्ण
स्तदादेवंस्तुवन्नापत्सहायकं॥ सर्वापदांमूर्ध्निपदंनिदधेशिवभक्तितः॥कावेर्याउत्तरीतीरेत्रिशांभर्यांतु
रेणुका॥पूजितापरशुरामेणसंस्तुतासर्वकामदा॥१३॥ ॥परशुरामउवाच॥ ॥देवित्वंगिरिजापति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रियतमेसर्वाधिसंतापहेत्वद्भुताधिनिवारके भगवतिमांपाहिलंरेणुके॥ दुःखानांविनिवारकेदिविषदांमा
३५ र्निसदाहारिकेस्थानेत्रैववि हारिकेत्रिनयनेतुभ्यंनमस्तेनमः॥१४॥ इत्थंपरशुरामेणसंस्तुतातत्ररेणुका॥
शिवांभवेस्थानवरेसंस्थितासर्वकामदा॥१५॥ तस्याच्यामालुवालेशांस्थानमुक्तिवनोषितं॥ अलुवालेश्व
रोदेवः पूजितोमुनिभिस्तुतः॥१६॥ ॥मुनयऊचुः॥ ॥ नमस्तेदेवायत्रिपुरदलनायांतकभिदेजगत्पा
त्रेहंत्रेत्रिनयनहरापारकरुण॥प्रसीदास्मभ्यंत्वंनवशिवपदाअंह्रिशिरसाप्रपन्नाःसंमग्नाःभवजलधि
मध्येमुनिगणाः॥१७॥ आलवालेश्वरस्तेषांमुक्तिस्थाननिवासिनां॥ ददौमहेश्वरस्तत्रस्थानेतत्तुचिरंत
नं॥१८॥ तदुत्तरेशिवस्थानेपंचवर्णेश्वराभिधं॥पंचभूतार्चितंलिंगंपंचवर्णेश्वराभिधं॥१९॥ मलये
समनुत्वामभूतैर्योभूच्चपूजितः॥ आकाशेनार्चितःप्राच्यांआदिपश्चात्सुरेशिवः॥२०॥ वायुनाचोत्त
रेवन्हिनेजसातत्रदक्षिणे॥भूम्याभूतपतिःशंभूरर्चितःसंस्तुतस्तदा॥२१॥ भैरवोवसतीशानप्रसादे
नोर्ध्वभागतः॥ ॥भूताःऊचुः॥ ॥ भवभूतपतेपिनाकपाणेहरगंगाधरपाहिनःसदा॥जगतःकारणकार
णाव्ययोत्रनवज्ञांशाजगतेर्वसामभूतः॥२२॥ इत्थंपंचमहाभूतास्तत्रैवेशापिनाकिनं॥पूजितोनिवसेदी
शःसोमस्कंदोर्ध्वभागके॥२३॥ तस्याच्यांमाधवोपीशंसमाराध्यत्रिविक्रमः॥वसेदीशप्रसादेनहरिःशो
तेनदुत्तरे॥२४॥ स्वभक्तकामदस्तत्रशिवंध्यायन्सदाहृदि॥ तुष्टावरेश्वरःप्राच्यांस्थानेतत्रसुरावृते
॥मेध्यकल्पेवृषस्तत्रततापपरमंतपः॥शिवस्योद्वहनेशक्तिंप्रसादात्प्राप्तवान्वृषः॥२६॥ तत्रस्थानेस श्रीशिव
तुष्टावदेवदेवमुमापतिं॥ वृषउवाच॥ ॥नमोनमस्तेवृषवाहशंभोमहोमहादेवविभोप्रसीद॥ त्वतुंग
देहोद्वहनेचशक्तिंप्रदेहिमेलोकपतेमहेश॥२७॥ तस्मिवृषपतेबालेस्थानेतस्मिन्ददौहरः॥त
स्मिन्स्थानेतुतत्प्रोक्तंवृषवाहेश्वराभिधं॥२८॥ ॥श्रीस्कंदउवाच॥ ॥ सह्योद्भवेयंशिवलिंग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संगनानटद्वयेपुण्यगाणेश्वसेव्या॥ तत्राधिकासासुकृतोदयाभिस्तस्यालरेसामणिकर्णिकेति॥२९॥
॥इतिश्रीशिवरहस्येसप्तमांशोत्तरभागेशिवस्थानवैभवेत्रिंशोध्यायः॥३०॥ ॥श्रीस्कंदउवाच॥ ॥
कावेर्यादक्षिणेतीरेस्थानंश्वेतवनाभिधं॥ सेवितंदेवमुनिभिर्गंधर्वैरसुरैरपि॥१॥ श्वेतारण्येश्वरः
साक्षाद्दुर्यारण्यदवानलः॥ तत्रनद्योर्मध्यगतंक्षेत्रंशंभोःप्रियंसदा॥२॥ दक्षिणेतत्रकावेरीउत्तरेम
णिकर्णिका॥ मध्येवहतितत्रैवकावेरीसरितांवरा॥३॥ जीवन्मुक्तिप्रदंक्षेत्रंवसतांतत्रमोक्षदं॥म
तानांतत्रजंतूनांदिशेदिशेशोमनुंपरं॥४॥ सद्येनरैस्तुश्रवणेश्रीमत्पंचाक्षरंपरं॥ कावेर्यास्तुजलेस्ना
त्वादृष्ट्वाश्वेतवनेश्वरं॥५॥ सजीवन्मुच्यतेतत्रनरःसंसारसागरात्॥ब्रह्मविद्यापतिश्चात्रश्वेतार
ण्येश्वरोहरः॥६॥ ददातिमुक्तिंभक्तानांस्वलिंगंपरिसेवितां॥ तत्रैवसोमवत्मर्केनेत्रजातोरुबिंदवः॥
॥७॥ सरसांत्रितयंतत्रस्नानस्यतामघनाशनं॥त्रिशक्षयंतिचपापानिसंगास्तत्रमहेशितुः॥८॥ स्थाने
पुण्यतमान्येवशिववनेत्रोद्भवानिच॥ वटोरुविटपीमूलेस्नात्वातीर्थेषुचत्रिषु॥९॥ तर्पयेत्तेषुचपि
तॄन्वटमूलोदबिंदवः॥ भोजयेद्ब्राह्मणान्तत्रपितृश्राद्धेनिमंत्रितान्॥१०॥ स्वपितॄन्तारये----
विमुक्तिदे॥पुण्यपर्वसुयात्रादिकावेर्योःसंगमेनरः॥११॥ स्नात्वाश्रीसंगमेशानंदृष्ट्वार्संतर्प्यवैपितॄ
न्॥ ग्रहणेसोमसूर्योत्थेपोषाषाढादिदर्शयोः॥१२॥ छायावनेशंदृष्ट्वात्रस्नात्वातीर्थेषुचत्रिषु॥ दृ
ष्ट्वाश्वेतवनाधीशंब्रह्मविद्यांशिवामपि॥१३॥ भद्रकालीतत्रघोरंधृतशूलोरुदंष्ट्रकौ॥ नृत्यंतौतत्र
दृष्ट्वैवतीर्णेस्तेनभवार्णवः॥१४॥ श्वेतोनामनृपःपूर्वमभवत्सोमवंशजः॥ सर्वसद्गुणसंपन्नोनिचु
लापुरनायकः॥१५॥ पंचविंशतिमेवर्षेतस्यराज्ञोगृहेवृतः॥ यायाचाहृत्यपंदृष्ट्वागौतमोमृत्युमाग
तं॥१५॥ ॥गौतमउवाच॥ ॥गच्छराजन्ममादेशात्कावेर्यादक्षिणोत्तरे॥ श्वेतारण्यारव्यईशानं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शरण्यं शरणं व्रज ॥१६॥ न बाध्य आयुषः शांतिः वर्षे मृत्युरुपस्थितः ॥ मृत्युनाभिगृहीतस्य किं राज्येनाप्य
३६ नेन ते ॥१७॥ मृत्युंजयं विना नान्यः न च मृत्युनिवारकः ॥ श्वेतारण्येश्वरं याहि शरण्यं पार्वतीपतिं ॥१८॥
पंचाक्षरमुपादिश्य भस्मरुद्राक्षधारणः ॥ श्रुत्वा श्वेतो नृपो विप्राज्ज्ञाप्यनेनेन रुद्रकं ॥१९॥ अप्रेषयत्तं न
पतिं मात्रे न्यस्त धुरं भुवः ॥ गौतमोऽथ ययौ तेन राज्ञा लत्श्वेतु कानने ॥२०॥ कावेर्यां तेन वै स्नात्वा श्वेतनी
र्थेषु च त्रिषु ॥ भस्मरुद्राक्षधृक भूत्वा जजापायुतशो मनुं ॥ रुद्रैकादशकं शंभुं श्वेतारण्ये शमर्चयन् ॥ त्रि
कालं बिल्वपत्रैश्च बसविद्यां शिवामपि ॥२२॥ धूपैर्दीपैश्च नैवेद्यैः प्रदक्षिणनतिस्तवैः ॥ तेनाथ कालं
श्वेतोसौ नत्रवर्षांतिमेन्नृपः ॥ दृष्ट्वा करालवदनं पाशहस्तं समीक्ष्य सः ॥ श्वेतारण्येश्वरं त्र्यक्षमस्तुवद्दे
न मे नसः ॥२४॥ ॥श्वेत उवाच॥ ॥अतिभीषणकटुभाषणयमकिंकरपटलीकृततनताडनपरिपीडन
मरणागमसमये ॥ उमया सह मम चेतसि यमशासन निवसन् शिवशंकर शिवशंकर हर मे ह
र दुरितं ॥२५॥ असदिंद्रियविषमोदयसुखसंहतसुकृते परिहर्षेण परितोषण्यकृतवाटकविकृते ॥ शा
मनाशानभवकानननिरतो भव शरणं शिवशंकर शिवशंकर हर मे हर दुरितं ॥२६॥ विविधाधिभिरति
भीतिभिरघतावि कसुकृतं शतकोटिषु नरकादिषु परिपातनविवशं ॥ दृढमामवसुकृतैरिह शिवया सह
कृपया शिवशंकर शिवशंकर हर मे हर दुरितं ॥२७॥ विषयायुतविवशोधितविशिनाद्दतसुखदेमकरा
वतमति संततकृतसाहसमिवशं ॥ परमारूप परिपालय पतितापिनभितिमां शिवशंकर० ॥२८॥ द
यितामम दुहिता मम जननी मम जनको गृह मे मिदभिति संततमरुभूमिषु निरते ॥ गिरिजासखजनिना
सुखविवशं कुरु सुकृतिं शिवशंकर० ॥२९॥ जनिताशानमतिमोचनशिवपूजनविरते ॥ रभितोदृशमति
मीदृशमहमहिते ॥ भयकामिहकामिदमते कुरु सुमतिं स्वचशामिन श्रममपि शिवशंकर० ॥३०॥ पित्रा श्रीशिव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पिनि सुरवरदर्पिनिपमयोश्रुतंतनयोमुहुः शिवयोर्मुहुरिह येपपदभयनिरूनसुकृत॥ इतिमेशिव
हृदयंभवतांनवपादयोः शिवशंकर०॥३१॥ शरणागतभरणाधनकरुणामृतजलधेशरणंतवच
रणंममभवसंसृतिवसतेः॥ परिचिंतयजगदुद्भयभियंमेतनुरवतेशिवशंकरशिव०॥ ३२॥ ॥श्री-
स्कंदउवाच॥ ॥ इत्थंश्वेतारण्यमद्भुतमहाकारुण्यवारांनिधिः कारुण्येरुवदंतिकंहनत्रेवतारण्या
धिनाथोहरः॥ देवास्तेकुसुमंववर्षुरथ्यरवात्श्वेतोपिशिवैकैकयंसमचकारगौतमपुनोनत्वाहरंस्वात्पुरं
॥३३॥ ॥इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरभागेश्वेतारण्यवैभवेएकत्रिंशोध्यायः॥३१॥ ॥
॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ नत्वाच्यांस्थानमस्त्येकंछायावनसमाह्वयं॥ परमंवसतांपुं
सांपावनंमुक्तिदंपरं॥ १॥ शंभोः प्रियकरंसाक्षान्मुनिभिः सेवितंसदा॥ छायावनेश्वरंदृष्ट्वासर्वैपापैः
प्रमुच्यते॥२॥ छायावनेशमध्येयः स्नात्वागच्छेद्धिमुक्तिदं॥ रुद्राणांदशकंतत्रफलंलब्ध्वासमुधि
तः॥ ३॥ मोदतेशिवलोकार्थेविमानेनगतेनमः॥ छायावनीपुरः सूर्यस्तत्रतेपेमहत्तपः॥४॥ भस्मदि
ग्धशरीरेसौरुद्राक्षाभरणावृतः॥ रुद्रंचप्रजपन्नुच्चैः पंचाक्षरजपेरतः॥ छायायासहितः सूर्योदेवं
छायावनेश्वरं॥ संपूज्यतत्रदेवेशंतुष्टावप्रमथाधिपं॥६॥ अर्यमानर्मयावाचा स्तौतिछायावने
श्वरं॥ ॥ श्रीसूर्यउवाच॥ ॥ छायावनेशभगवन्शशिधाममौले गंगोत्तमांगधृतबालकुरंगशं
भो॥ त्वच्छक्तिवैभववशाः जगदेतदेवब्रह्मेशविष्णुपरिपालननाशसृष्ट्या॥७॥ नत्वाअनन्यः
शरणोपिपिशाचवाचासंस्तौमिनौमितवपादसरोरुहंमे॥ स्वर्ंशरण्यसतुकंभवदावनायसंतप्रम्
र्धसुजनावनदंसुचरित्रं॥ ८॥ त्वांलिंगसंगकिलपापभंगोनगांगदग्धपरिशोभितभस्मभूषं॥ यो
षार्धकायधृतशेषहारपोषायमेभवभवाब्धमुदाग्रपूषन्॥९॥ इत्थंछायावनेशानंपरिपूज्यार्यमानदा॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

छायावने च दययास्थाने लेभेमहत्तरं॥ १०॥ तस्मात्स्थानं पुण्यतमं संसेव्यं पापभीरुभिः॥ मुक्तिर्हि वस
तां तत्र श्रीमच्छायावने शिनुः॥ ११॥ प्रसादेन सदा तत्र जनानां शंभुसेविनां॥ किं पुनर्बहुनोक्तेन मुनि
भिः परिसेविते॥ मुक्ते छायावने शानमाश्चर्यो भक्तितत्परः॥ पुराकवेरो नृपतिः सूर्यवंशोद्भवो महान्॥
॥१३॥ तं दृष्ट्वा देवमीशानं ववंदे चरणौ नृपः॥ प्रहृष्टो यत्तस्य माहेशो --- स्यपिनाकिनः॥ १५॥ तदातु
ष्टावतं सांबं अंबिकापतिमीश्वरं॥ ॥कवेरनृपतिरुवाच॥ ॥नमो नमस्ते धनस्वामि सोम मम धुवामे
सगुण त्रिशूलिन्॥ प्रसीद मे मा मम पुत्रमीश प्रदेहि मह्यं शाधुरंधरं हर॥ १६॥ ततस्तु त्यातुष्ट एव शोम
हीशं नमथाब्रवीत्॥ कवेरं प्रणतं तत्र प्रांजलिं प्रांजलेश्वरः॥ १७॥ ॥श्रीईश्वर उवाच॥ ॥पुत्रात्स्थ
न गुणं पुत्री तव दत्तान्नपो तम॥ कावेरीति भविश्रीते कन्या रूप गुणान्विता॥ सा त्वया कस्यचिन्नैव दा
तव्या नृपसत्तम॥ १॥ सभविश्री सरिद्रूपा स्त्रस्यास्तीरे वसाम्यहं॥ १९॥ क्षेत्रोत्तमं बुचोले वैतेन पुण्या
भवेदियं॥ स्नानस्यतां पापशमनी शामना लि नियारिणी॥ २०॥ तथेति प्रांजलिः प्राह शिवोप्यंतर्दधे हरः॥
कवेरः सपुरं प्राप कालेन तनयाभवत्॥ २१॥ कावेरीति तदा नाम्ना रूपौदार्यगुणान्विता॥ लालिता वर्ध
त मुदा धियैवं प्राप सा तदा॥ २२॥ जिज्ञासुरवदत्तातं कस्मैदास्यसि मां पितः॥ ततः कोपेन तां तत्र अशाप
न्नृपतिः पिता॥ २३॥ ॥कवेरनृपतिरुवाच॥ ॥भवापगा सद्यः सुता संगाभिलषिता सदा॥ न सागरस्य सं
गत्वं प्राप्स्यसे शापितामया॥ २४॥ ततः कालेन तत्राभूच्चोले सह्याद्रुवासरित्॥ कावेरीति तदा लोके सिंधुनी
रे महेश्वरः॥ २५॥ प्रतिष्ठाप्यार्चयामास संगमेश्वरमीश्वरं॥ कावेरीपतने स्नात्वा भस्मरुद्राक्षधारिणी॥
॥२६॥ तुष्टाव संगमेशानं पापभंगकरं हरं॥ ॥कावेर्युवाच॥ ॥ श्रीसंगमेश्वर महेश्वर शंकरेशपाहि
प्रसीद मयि देहि कृपाकटाक्ष॥ त्र्यक्षाव मां गणपतेन वसुप्रसादात्संगं प्रयामि भवसागरगास्मि शंभो॥ २७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ श्रीस्कंद उवाच॥ ॥ इत्थं स हनूमान्दृष्ट्वा स्तुतिवशात्तदा हृष्टो बभाषे तथा॥ संगेशो जनपापभंजनक
रः पर्वण्यथा यात्रास्त्विति॥ संगस्येभयनाशनात् पापनाशनकरे सर्वेस्यधाम्नाविनां भक्तिंगे त्र भसोक्षध्रुपुरेस
माधवमुनेः पंचास्यराज्ञस्वस्वरसतीरे ये शिवलोकमशूतमधः संदर्शयत त्र वै॥२८॥ बाणस्तस्य पुरस्य दक्षि
णतटे देवेसया स्यैवनेशं शंकरं तत्रार्चिता नित्योषितः॥ तदा मुदे क्षणवशात्पापायभंगाय हि॥२९॥ ॥
इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे संगेश्वरवैभवे द्वात्रिंशोध्यायः॥३२॥ ॥श्रीउग्रा
यनमः॥ ॥श्रीस्कंद उवाच॥ ॥ श्रीस्कंद उवाच॥ ॥श्वेतारण्ये तथैवाग्ने जटायोः स्थानमुत्तमं
॥लेचिकीत्रार्चिकीम ह्येशो वेदेन तोपि गद्यते॥१॥ तं चूडपूनभस्मोग्रमात्रया वै पवित्रया॥पापरो
गादितापेभ्यो मुच्यते मानवो प्यदन॥२॥ बालांबिकापतिः शंभुः दृष्टो मुक्तिप्रदायकः॥सर्वे षां कामदा
नेहि निपुणः कामनाशनः॥३॥ तत्र बालांबिका देवी षण्मुखो मरसंनुतः॥ तत्र श्रीवैद्यनाथं तं पू
जयंति सुरासुराः॥४॥ मुनयो वैद्यनाथस्य लिंगं संपूजयंति हि॥ तत्र तीर्थे परं पुण्यं देव्याकारुण्यपू
रितं॥५॥ स्नात्वा गारकवारे तु दृष्ट्वा वैद्येश्वरं शिवं॥ बालांबिकां कुमारं मां तस्मिन्स्थाने सुपावने॥
॥६ सर्वान्कामानवाप्नोति नरो रोगैरभिभूयते॥ भूतप्रेतपिशाचानां बालांबापि निवारिका॥७॥ तत्स्था
नरक्षणे चाहं शक्तिहस्तेन नियोजितः॥ भवरोगमहावैद्यो भिषजां पतिरीश्वरः॥८॥ भस्मोयमात्र
या सर्वान् मोचयेद् धररोगतः॥ तादृशं परमं स्थानं न कुत्रापि भविष्यति॥ जटायुषा पुरा तत्र तप
स्तप्तं महेश्वरं॥ समाराध्याचमत्तत्र वैद्यनाथं तदास्तुवन्॥१०॥ ॥जटायुरुवाच॥ नमोस्तु वै
देव महेशशंभो हालाद्यविश्वेश्वर पणिनाद्य॥अभेद्य अछेद्य पिनाकपाणे आद्यः सुराणां परिपा
लयाद्य मां॥११॥ जटायोरायुरुत्कृष्टं प्रादाद्वैद्येश्वरस्तथा॥चंडांशु दग्धपक्षेश्च स तत्रैवाभूत अभूत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नुः।। वेदावैद्येश्वरं तत्र सममभ्यर्च्य प्रतुष्टुवुः।। ।।वेदा उचतुः।। ।।शंभो त्वं मरुतां पिता त्रिनय
नो देवस्त्विषु र्मोमव सोमः त्वं अरुणो सुमंगलनरः पाहीशभा त्वदृशा।।१३।। अन्नानां चपतिस्त्वमेव
३८ हि पिता बिल्वाशिवाधानमं।। ओंकारस्त्वयवाचकस्त्वचस्वरः सर्वेनमस्तेनमः।।१४।। इत्थं महेश्वरं वे
दाः वैद्यनाथं स्तुनोरताः।। आदित्योपिचवैद्येशं अर्चोदत्वात्र संस्तुवन्।।१५।। ।।आदित्य उवाच।।
वेदावेद्य महेश्वरे चरण्यसद्येन मायनिकरेश्वरमहादेवेश सद्योद्यमं।।श्रीवैद्येशासदैवंतपदसु
गंभन्मोक्षि संस्कुकुरु।।१६।। नेनाहं भगवन्सदैवसुनयं लोकं पुनामीश्वर।।आदित्यो वैद्यनाथं तन्स्तु
त्वाभासयते जगत्।।१७।। अंगारकोपि देवेशं बालांबापतिमीश्वरं।। ।।अंगारक उवाच।। ।।नमस्तेस्तु
विश्वाधिकेशाप्रसीदाद्यशंभो मुदामामवाद्य हृदामां सदा।। नमस्यामि कायैः करोमीशपूजां कराभ्यां मु
भाभ्यां नमस्यामि शंभो।। श्रीवैद्यनाथं देवेशं अस्मादाराध्य मीश्वरं।। तत्र हि वैद्यनाथं तं पूजयामि
भिषग्वरं।।१९।। बालांबया मुदा स्तोमि वाचा कार्येण नो मिनं।। ।।श्रीस्कंद उवाच।। ।। अंभोधराया
मलकुंतलायै तडित्प्रभातुन जटाक्षसाया।। गिरीश्वरायै निखिलेश्वराय श्रीवैद्यनाथाय नमः शि
वाय।।२०।। प्रफुल्लनीलोत्पल लोचनायै सोमार्कवह्न्यारुण लोचनाय। समेक्षणायै विषमेक्षणाय
श्रीवैद्यना०।।२१।। कस्तूरिकाचंदनलेपनायै श्मशानभस्मांगविलेपनाय।। कृतस्मरायै विकृतस्मराय
श्रीवैद्य०।।२२।। प्रपंचसृष्टेनिखिलेश्वरायै समस्तसंहारकृतांबुवाय।। जगज्जनन्यै शावभस्मले
पिने श्रीवैद्य०।।२३।। मंदारमालाललितालकायै कपालमालांकितशेखराय।। दिव्यांबरायै चदि श्रीशिव
गंबराय श्रीवैद्यनाथा०।।२४।। विचित्ररत्नोत्तमकुंडलायै स्फुरन्महापन्नगकुंडलाय।। शिवप्रियायै
चशिवप्रियाय श्रीवैद्य०।।२५।। पादारविंदे मणिनूपुरायै पादारविंदाश्रितभोगिनेसद।।कलाधरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

येचकलाधराय श्रीवै॰ ॥२६॥ अंतर्बहिश्चोर्ध्वमधश्च मध्ये पुरश्च पश्चाद्विदिक्षु भूम्यां ॥ सर्वात्मि
काये सकलात्मकाय श्रीवैद्यनाथाय नमः शिवाय ॥२७॥ इत्थं तत्र सुरासुरेंद्रनमितं श्रीवैद्यना
थाभिधं लिंगं मंगलदं स्मरन्भगवतो बालांबिकामंदिरं ॥ वारंवारमनुस्मरामि हृदये तत्ध्यानव
र्यमुदा हस्ते त्वाक्षिधरो वसामि शिवयोः पादांबुजाराधकः ॥२८॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये स
मांशे उत्तरभागे वैद्यनाथवैभववर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥ श्रीउग्राय नमः ॥ श्रीस्कंद उवाच ॥ ॥
तदुत्तरे महेशस्य स्थानं श्रीकालमंज्ञिकं ॥ द्रोणीपुरं ब्रह्मपुरं तत्र ब्रह्मपुरीश्वरः ॥ १॥ ब्रह्मणा भैर
वेणापि तत्र स्थाने तपः कृतं ॥ रुद्रस्थाने निवसतां मद्वचः श्रृणु संशयः ॥ २॥ मुनिभिर्देवगंधर्वैः सिद्धै
श्च परिशोभितं ॥ पुण्यं च दर्शनात्तत्र वसतां भुक्तिमुक्तयः ॥३॥ पुरा ब्रह्मा मुनिगणैः सेवितः प्रेरितस्तत्र चा
गतः ॥ तत्स्थानवैभवं दृष्ट्वा तत्र तेपे महत्तपः ॥४॥ भस्मधृक्तनियतो मौनी रुद्रजप्यपरायणः ॥ त्रिका
लमर्चयन्देवं तत्र ब्रह्मवने विधिः ॥५॥ तुष्टाव देवं हृष्टात्मा सांबं चेंदुकलाधरं ॥ ॥ ब्रह्मोवाच ॥ ॥न
मः प्रपन्नार्तिहराय शंभवे भयो भवे पापहराय तुभ्यं ॥ गीर्वाणवृंदस्तुतपद्मकाय नमोस्तु ब्रह्मेंद्रहरिस्तु
ताय ॥६॥ सनातनायागमबोधिताय भक्तौघमुक्तिप्रवणाय तेनमः ॥ द्रोणीपुरेशाय महेश्वराय श्री
कार्यनाथाय नमोस्तु शंभवे ॥ ७॥ ब्रह्मणा संस्तुतो देवस्तत्र स्थाने मुनीश्वरैः ॥ तत्र ब्रह्मवनाधी
शो नस्मै वेदान्प्रदत्तवान् ॥ ८॥ भैरवोपि सदा देवं समाराध्य महेश्वरं ॥ ततापनियतं घोरं द्वाद
शाब्दमहर्निशं ॥ ९॥ भस्मोद्धूलितसर्वांगे त्रिपुंड्रपरिशोभितः ॥ कपालमालाभरणः शूलासक्त
करांबुजः ॥१०॥ चंडिलश्चंद्ररेखांकः दिग्वासाः पाटलांघ्रिकः ॥ श्वभिः परिवृतो घोरैर्वेदागमपुरा
णकैः ॥ ११॥ जजाप नियतो रुद्रं श्रीमत्पंचाक्षरं परं ॥ एकादशगणं रुद्रं नियमाद्राध्यतो मनु ॥१२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यायन्द्रोणिपुरेशानंअर्चयन्भैरवोत्तमैः॥ बिल्वैःपंकजदामाद्यैःमंदारार्कैःसुचंपकैः॥१३॥ शूलेनखातयित्वा
३९ त्रतीर्थंदेवस्यसंन्निधौ॥ शूलखाताभिधंतीर्थंपावनंपापवारकं॥१४॥ भौमवारार्कवारेषुनियमंस्नानमा
चरेत्॥ ब्रह्मेश्वरस्यवायव्यांलिंगंवैभैरवेश्वरं॥१५॥ प्रतिष्ठाप्यार्चयामासभैरवस्तत्रशंकरं॥ समासाद्यैक
पादेनभैरवोपूजयद्धरं॥१६॥ ब्रह्मेशानंभैरवेशंयोगिनीभिरनेकशः॥ गीतनिष्ठैःसटन्मादिवाद्यैंतत्रा
थवादयत्॥१७॥ स्तोत्रैर्भुवनाधीशंभैरवोघनगर्जनः॥ ॥ श्रीभैरवउवाच॥ हरहरशंकरदेवदया
करपुरहरभवहरसुंदरभो॥ देवमुनिव्रजगणगणपूजिततनुमनुमनसाप्रणमामि॥ गुरुशरभस्कंदस्क
कशिक्षकत्र्यक्षमहेश्वरपाहिविभो॥ शांतसमस्तसुरासुरसुरवरभस्मधृतामलशूलहर॥१९॥ पाहि
पदाहिधरांतकहरहरपापमपाकुरुशंकुरुमे॥ दंडविखंडितमुंडधरांतकखंडकखंडकभंडहर॥२०॥
तंडुलपूजितपदयुगपंडितजनमुनिपूजितशंभो॥ मामवतवपदसक्तमसक्तामखंतवदर्शनतोन्यसुरा
धमतः॥२१॥ हेनिधराव्ययपाहिसदाशिवदेवदयाकरपाहिसदा॥ इत्थंभैरववर्येणस्तुतस्तुशोमहे
श्वरः॥ तस्मैप्रसन्नोभगवानुवाचप्रहसन्निव॥२२॥ ॥ श्रीशिवउवाच॥ ॥ भैरवत्वंममादेशा
च्छिवक्षेत्रेषुपापिनां॥ शासकोभवनैतेषुशमनस्यगणागमः॥२३॥ काश्यांत्वंवसतत्रैवकालभैरव
नामकः॥ अत्रत्यसद्धजानीरशिवक्षेत्रेषुपापिनां॥२४॥ शासकोभैरवात्रत्वंशासःप्रलयसंततं॥ अं
गारकार्कवारेत्रयेत्वांसंपूजयंत्यपि॥२५॥ त्वदंगलेपयंत्येवसारैर्मृगमदोद्भवैः॥ भक्ष्यैःसवटके
यैस्त्वांविनिवेद्यनमंत्यपि॥२६॥ तेषांमिष्टप्रदोभूयःसततंत्वत्रवासिनां॥ विनाश्रीवांछमुल्लुरस्य श्रीशिव
व्यापारोवसाधुना॥२७॥ शिवक्षेत्रेषुवसतांपापिनांपापशोधकः॥ भवस्वातंद्रितोनित्यंभवेभवपदा
र्चकः॥२८॥ इत्थंदेवेनसंदिष्टोभैरवोप्यवसत्तदा॥ तस्मिन्छ्रीश्रीकाशिनगरेसर्वेषामिष्टदायकः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भौमार्कवारयोः पूजां भैरवस्य प्रतुष्टये ॥ कुर्वंति स्तुतिभिश्चैतैर्भैरवस्य सुरासुराः ॥ ३० ॥ स दैवैंद्रो भया
त्तत्र दैत्यानां भैरवं तदा ॥ जगाम शरणं तत्र भैरवं तुष्टुवे हरिः ॥ ३१ ॥ ॥ इंद्र उवाच ॥ ॥ हे भैरवाव
सितश्चूलधरांगसंगमात्तं गरूत्ति वसनानललोचनाद्य ॥ विधासुरासुरसमूहशिवरक्ष रूक्षुपापौघवि
शकयमाधिक देवपाहि ॥ ३२ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे श्रीकालवैभ
वे चतुस्त्रिंशोध्यायः ॥ ३४ ॥ ॥ श्रीउग्राय नमः ॥ ॥ श्रीस्कंद उवाच ॥ ॥ श्वेतारण्ये तथा गेण्यां घ
टेशांशांभवं स्थलं ॥ सर्वकामप्रदं साक्षात्सम्यक्प्रीतिकरं शुभं ॥ १ ॥ वसतां पुण्यदं शंभोः प्रसादेन मुनीश्वर
॥ शिवदा घभिदं तीर्थं तत्र शंभोः पुरः स्थितं ॥ २ ॥ तस्मिन्स्नात्वा नरः श्वेवपौर्णमास्यां चित्रभे तदा ॥ शिवमु
द्दिश्य यत्किंचिद्दत्वा वै शांभवे धनं ॥ ३ ॥ तिलं तं डुलमुद्गादि वासो गोधनभोजनैः ॥ भस्मवित्तानुसारेण
शिवमुद्दिश्य तत्र वै ॥ ४ ॥ सर्वं कोटिगुणं ज्ञात्वा शिवक्षेत्रेषु संततं ॥ इतरेभ्योधिवि प्रेभ्यः शिवभक्तेत्वनं
तकं ॥ ५ ॥ देव्यानुरागः कर्तव्यो शिवक्षेत्रे विशेषतः ॥ पश्चिमाभिमुखं लिंगं घटेशानं महाद्भुतं ॥ ६ ॥ ॥
अभीरामा तत्र देवी अभितो रम्यसुंदरा ॥ तत्र वासः पुण्यकालैर्लभ्यते घटजे स्थले ॥ ७ ॥ सर्वेषां प्राणिनां
तत्र वसतां कालजं भयं ॥ कालकालप्रसादेन नैव भयाच्च तत्र वै ॥ ८ ॥ मृत्युंजयो महादेवस्तत्र पादेन चांत
कं ॥ अहनच्छूलपातेन कालसंहाररूपधृक् ॥ ९ ॥ दंष्ट्राकरालवदनः स्वदृगंगारलोचनः ॥ पुरा मृकंडुत
नयस्तत्र तेपे महत्तपः ॥ १० ॥ भस्मादिग्धस्त्रिपुंड्रांकः रुद्राक्षाभरणोज्वलः ॥ रुद्रपंचाक्षरजपं कुर्वन्ध्याय
न्महेश्वरं ॥ ११ ॥ त्रिकालमर्चयन्देवं बिल्वपत्रैर्घटेश्वरं ॥ प्रसादायाभितुष्टाव तत्र देवं मृकंडुजः ॥ १२ ॥
॥ मार्कंडेय उवाच ॥ ॥ ब्रह्ममुरारिसुरार्चितलिंगं निर्मलकारणशोभितलिंगं ॥ जन्मम तीरजनाशन
लिंगं तत्प्रणतोस्मि सदाशिवलिंगं ॥ १३ ॥ देवगणस्तुतदिव्य सुलिंगं कामविनाशककारणलिंगं ॥ रावण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धैर्यविनाशनलिंगं तं प्रणमामि सदाशिवलिंगं ॥१४॥ यक्षभुजासुरविक्षितलिंगं कुक्षिकसर्वजगत्त्रय
लिंगं अंतकवामविनाशनलिंगं तं प्रणमामि सदाशिवलिंगं ॥ चंदनकुंकुमलेपितलिंगं पंकजबिल्व
दलार्चितलिंगं ॥ शेषफणाफणभूषितलिंगं दिनकरकोटिसमप्रभलिंगं सुरगण विष्णु गणार्चितलिं
गं नागगणार्चितसंस्तुतलिंगं तं प्रणतोस्मि घटेश्वरलिंगं ॥१५॥ इत्थं मृकंडुतनयो घटेशं संस्तुवन्
स्थितः ॥ तदा घटेश्वरस्याग्रे महाकालः समागतः ॥१६॥ हयारिमारुह्य सदंडपाणिः करालदंष्ट्रोध
तपाशहस्तः ॥ गदाग्नदंडांकुशपाशपाशिभिः समावृतो गात्रवगणैः सवैयमः ॥१७॥ मृकंडुसूनुः सभ
योमहेशलिंगं समालिंग्य घटेश्वराख्यं ॥ महेश विश्वेश्वर पाहि मामवं प्रसीद सीदंतमहो महेश ॥१८॥
पिनाकपाणे भगवन् कपर्द्दिन्कालं हरस्वात्र महेश्वरेश्वर ॥ इत्थं मुनीश्वरसुतं परिरभ्य कुंभलिंगं लदास
दृढपाशयुतः सकालः ॥१९॥ स्वपाशसंवेष्टनतः सलिंगं चकर्ष चरवेर्गणपैः जगर्त यमा उवाच ॥ मत्पा
शबंधस्य तवाद्य कोवनेप्रभुर्विमुच्यां गहि मां द्विजार्भक ॥ राज्ञां सहस्रं क्रतुमुख्यलक्षितं तपस्विवृंदं रं
सचराचरं जगत् ॥२१॥ मयैव नीतं च नयामि चाग्रे मा क्रोश विश्वेश्वर पाहि मामिति ॥ अखर्वगर्वोद्ध
तकालवाक्यं निशम्य शंभुर्घटजेशलिंगात् ॥२२॥ त्रिशूलपाणिर्भगवान् जगत्पतिः त्रिलोचनो या
विरभूद्यं दहन् ॥ कालं दिधक्षन्निवलोचनैस्त्रिभिस्त्रिशूलमौले तजधानवोरसि ॥२२॥ व्यसुः
पपात्राथ हयारिपृष्ठात्कालस्तदाशूलवरेण भिन्नः ॥ वज्राभिघातेन यथा गिरींद्रः सुस्राव तद्वत्सगतं
चशोणितं ॥२३॥ गणास्तदा कांदिशीका बभूवुः सीतेयमेरेयदेवेन तत्र ॥ जगर्जुरुच्चैर्मुनयः सुराश्च श्रीशिव
रवात्पपात वृष्टिः कुसुमस्य तत्र ॥ नेदुस्तदा दुंदुभयो दिवि स्थाम कंडसूनुः प्रसमीक्ष्य शंकरं ॥ तुष्टाव
तं स्पुरतः पुरारिणाकालं प्रसीदेशविभो महेश ॥२५॥ तदा महेशः प्रसमीक्ष्य बालमुवाच दत्तं तव चा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुरत्तमं॥ आकल्पसप्तकं वसशंकरार्थकः त्वं षोडशाब्दो भविताद्विजार्भक॥ स्थानेत्रवासात्मम पूज
नस्तवैः॥ मुक्तोसि कालेनैंम कंडुज॥ इत्येवं हि ब्रह्मपुरोगमैर्हरः प्रसादितः पाहिशिवेति काले॥ उवाचचा
बोधयदीश्वरेश्वरः यमं स्वभक्तं प्रविमोचयात्र॥ २८॥ ॥श्रीशिवउवाच॥ ॥ स्थानेघटेशे शिवभ
क्तवर्यान्जनान्मदीयानपि क्षेत्रकस्थान॥ विसृज्य पश्चाद्दुष्यनयाहि चान्य न स्तवाधिकारो नयमात्र
शुशास्यते॥ २९॥ ॥ श्रीस्कंदउवाच॥ ॥ इत्थं शिवाज्ञामुपलभ्य धर्मोभियापुरीं स्वांस्वगणान चोदया
त॥ धिशोषनक्षेत्रगणेषु शंभोः घटेश्वरे माभिनियात भोगणाः॥ ३०॥ ॥इति श्रीशिवरहस्ये उग्राख्ये सप्त
मांशे उत्तरभागे घटेशवैभवे पंचत्रिंशोध्यायः॥ ३५॥ ॥श्री उग्राय नमः॥ ॥ श्रीस्कंदउवाच॥ ॥तद्द
क्षिणे तदीशान्यां उत्तरे चाग्निनैरृते॥ स्थानानि देवदेवस्य तत्र पुण्यतमानि हि॥ त्रिनले शंमहास्थानं
नलाराधितमुत्तमं॥ वीरसेनसुतस्तत्र पूजयामास शंकरं॥ २॥ तत्र तुष्टाव देवेशं भक्त्या पुण्यमहेश्वरं॥
॥ ॥नलउवाच॥ ॥ हर महेश विभो पिनाकपाणे धृतसोम फणीशविभूषण॥ परमेश सुचंद्रसुकप
र्दधिलसद्गांगतरंग मामवेशं॥ ३॥ इत्थं संस्तूय राजा तु स संप्राप्य महद्वरान्॥ राज्ञं राजा तदा प्राप द-
मयंत्याशिवार्चनात्॥ ४॥ तस्माच्चांकारकारारव्यं स्थानं शंभोस्तु पावनं॥ तत्र राज्यं महेशानं नित्यकल्याण
संज्ञिकं॥ ५॥ हरिराधयामास कारकालेश्वरं शिवं॥ ॥ हरिरुवाच॥ ॥नमस्ते देवदेवेश त्रिनय
न हर पार करुण प्रसीदेशानाद्य शशिधर उमाकांत भगवन॥ नवालोको लोके निरतिशय भक्तेष्वसमवि
भो विमुक्त्यै सक्तं मामव शिव दयासागर विभो॥ ६॥ त्रिकालकालसंज्ञं च स्थानं शंभोस्तु पुण्यदं॥ तत्र
संवसतां पुंसां शिव एव विमुक्तिदः॥ ७॥ तत्र जन्हुः पुराभ्यर्च्य तुष्टावेशं कृपांबुधिं॥ ॥ जन्हुरुवाच॥ ॥
जयशंकर पार्वतीपते हर रुण्णांकधराद्ययाद्यमे॥ प्रसीद मामत्र नतार्चनेरत नंदिश्वेशादेवेश सुकारु कंधरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ तद्दक्षिणे सितभर्गाख्यं कारंधान महस्थलं॥९॥ तत्र लिंगं समभ्यर्च्य कारंधानेश्वरं हर॥ कहोलः तुष्
वे सांबं भक्त्या परमया मुदा॥१०॥ ॥कहोल उवाच॥ ॥श्रीकालकालभवपापहराव्ययेशाविश्वाधिक त्रि
नयनाव पिनाकपाणिन्॥ गंगाधरांतक हर प्रमथाधिनाथ पाहि प्रसीद दय या सुखधाम भूमन॥११॥ तदंतरे
चकदलीवने शास्थानमुत्तमं॥ तत्राराध्येश्वरं भक्त्या शौरि तुष्टाव वै हरिः॥१२॥ गौरीशा जंमहादेवं द्विजराज
कलाधरं॥ ॥शौरि उवाच॥ ॥ यक्षराजसखदेव दयस्व विप्रराज कलिनाशक शंभो॥ पक्षिराजपतिपूज्य
पदाब्ज देवराजवरदाव महेशा॥१३॥ तद्दक्षिणे त्रिधामेशं सोमधामोरुशंकरं॥ सोमस्तत्रेश्वरं पूज्य तुष्टा
व प्रांजलिर्हरं॥१४॥ सोम उवाच॥ नमस्ते त्रिधामेशा सोमोत्तमांग प्रसीदाधुना देवदेवेश शंभो॥ सुगंगान
रंगोपदीव्यत्कलापप्रसन्नो भवाद्ये वशंभो विभो मां॥१५॥ तन्नैर्ऋत्ये त्रिशृंगेशं त्रिभिः शृंगैर्युतं स्थलं॥
तुष्टाव च त्रिशृंगोपि त्रिसुपर्णैर्विभुं शिवं॥१६॥ प्रसन्नो सि चेन्मे देहि भुक्तिमुक्तिं च मम मघ च॥ तत्प्राच्यां
करकं स्थानं करंधमतपार्चितं॥१७॥ करंधमेश्वरो देवः तीर्थं कारंधमाभिधं॥ करंधर्मः प्रतुष्टाव रूपामूर्तिं
सदाशिवं॥१८॥ ॥करंधम उवाच॥ ॥शंभो प्रियकरस्थाने कविर्भो देवाधिदेवेश्वर विश्वाधिशारूपां
कुरुष्व भगवन्सिध्यै विमुक्त्यै मम॥ तदश्मकं तद्दक्षिणे स्थानं पापहरं परं॥१९॥ अदश्वेश्वरमीशानं यं
त्रै पेप्यल्यस्तु तद्वरं॥२०॥ ॥पैप्प्यल्प उवाच॥ ॥ वंदे अदनेश्वरपादपद्मं अदत्तपुण्यप्रदमेव रम श्रीशिव
द॥ किं मे धुनैधत्रुगनैः सुतदारसंधैः अस्त्रायमे जगति तेच गदां शरण्यं॥२१॥ ॥श्रीस्कंद उवाच॥
त्रिशृंगेशो ततः प्राच्यां लिंगं पापेकभंजनं॥ तत्राराध्यास्तुवत् गार्ग्यो त्रिसंगेशं महेश्वरं॥२२॥ ॥
गार्ग्य उवाच॥ ॥ अनंगमातंगहरावशंकर प्रसीद गंगाधर पार्वतीशा॥ श्रीनीलकंठेश दयाघकुंठ
वैकुंठपूजार्ह सुपादशंभो॥२३॥ ॥ स्कंद उवाच॥ ॥ एवं स्थाने धर्मं सुशंभुर्द्रुहिणभुवसुरेश्वऋषि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भिर्विष्णुनार्च्यदेवोथेदसिस्वाम्मुनः सभगवानप्रस्तायल्लिंगोपिश्मन॥ लिंगेषुप्रथमानपूजनविधिंदा
तुंचमुक्तिपरांसर्वापद्विनिवारणायजगतांश्रीचंद्रचूडोहरः॥ २५॥ ॥ इतिश्रीशिवरहस्येउग्राख्ये
सप्तमांशेउत्तरभागेशिवक्षेत्रवैभवेषट्त्रिंशोध्यायः॥ ३६॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥
तद्दक्षिणेमहत्स्थानंकमलालयमुत्तमं॥ तदेवहाटकेशाख्यंक्षेत्रमुक्तिप्रदंसदा॥ १॥ वसतांपापशमनं
शिवभक्तिविवर्धनं॥ कालिंदीयहरंसाक्षात्प्रक्षाल्यमनुत्तमं॥ २॥ लिंगमंडलसत्कानांतीर्थखंडविरा
जितं॥ चंडांशुतनयोदंडसर्वदर्पविनाशनं॥ ३॥ देवतीर्थंक्षीरकुंडंतीर्थद्वयमनुत्तमं॥ तत्रस्नात्वानरो
दृष्ट्वापातालेहाटकेश्वरं॥ ४॥ जीवन्मुक्तोभवेदेवपापराशेर्विमुच्यते॥ भूकैलासंमहाक्षेत्रंपवित्रंव
सतांसदा॥ ५॥ ब्राह्मणायग्रासमात्रंदत्वान्नंकोटिभोजने॥ यत्फलंतत्फलंभूयात्तस्मिन्स्थानेमुनी
श्वर॥ ६॥ देवतीर्थोदकेनेवयपितॄंस्तर्पयेत्तवकान्॥ दशापूर्वापरास्तस्यपितरः षोडशाब्दकं॥ ७॥
तृप्तिसंप्राप्नुयुस्तत्रअन्नश्राद्धादनेनकं॥ लिंगाख्यानंतत्रमुनेश्शृणुष्वगणपैःसुरैः॥ ८॥ हाटकेशंम
हालिंगंसुरासुरमुनीश्वरैः॥ पूजितंमुक्तिदंसाक्षाद्दर्शनात्तज्ञानदंपरं॥ ९॥ तल्लिंगंतत्रसंपू
ज्यहरंब्रह्मर्षयोस्तुवन॥ ॥ देवर्षयऊचुः॥ ॥ श्रीहाटकेशाकरहाकृतिनागनाथककोंटरव्यक
रटिन्वगलंकृतांग॥ पापाहियाटनसमीरणदेवसंघ्यकोटीरअद्रितनयांबुजहेनमस्ते॥ १०॥ तत्राच
लेश्वरंलिंगंआश्रितानाभिमुखंपरं॥ मुनिदेवगणेंद्राद्यैः स्वस्थानेपरिपूजितं॥ ११॥ संस्तुतंपरयाभक्त्याद्
ष्टुमोक्षप्रदायकं॥ ॥ मुनयऊचुः॥ पापाचलादिभिदुरोसिजलेशशंभोभक्तावनेकनिगुणस्तरुणेंदु
मौले॥ १२॥ त्वल्लिंगसंगतदृशांकिलपापभंगः सद्योविमुक्तिमपिदित्ससिभक्तवंदे॥ १ । तत्रसिद्धे
श्वरंलिंगंसिद्धवंदार्चितंस्तुतं॥ इष्टंसिद्धिप्रदंतत्रयद्यधिकामैरपिस्तुतं॥ १३॥ ॥ सिद्धाऊचुः॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 नमस्तेसिसेशात्रिनयनभवापारकरुण कृपालोकामारेलरुणाशान्शिचूडालभगवन॥ सदास्माकं
 सदास्माकंसिध्येजगदुदयरध्येतवविभोसमीक्षंनेदेवाहरिविधिहरीशानमुनयः॥१६॥ तत्रानंदे
श्वरंलिंगंदृष्ट्वापमानंददंतनः॥महातुंदिलपापानांविनाशकरमुत्तमं॥१५॥ ब्रह्मादिविबुधैःपूज्यंस्तु
तस्तेसर्वकामदं॥ ॥ब्रह्माद्याऊचुः॥ ॥ आनंदेशमहेशशंकरविभोमंदारमालार्चितं॥ वंदारादि
मुनींद्रवृंदनिवहैःसंपूज्यपादांबुजं॥शंभोतुंदिलविघ्नपार्चितमुदानित्यंसदात्रावमां॥ भस्माभ्यक्त
सुभक्तमुक्तिवरदस्त्वांस्तोमिनोमीश्वर॥१७॥ तस्मिन्नेवपरेस्थानेवल्लीदारंमहेश्वरं॥ दृष्ट्वान्वि
तंपूजितंचस्तुतंसर्वार्थदंमुने॥१८॥ विष्णुःपुरासुरान्जित्वासगर्वेधनुषाशरैः॥धनुषःकोटिमा
रूढ्यतत्रस्थास्वशिरोहरिः॥ १९॥उपाधिकमथवैदेवास्तस्मिन्विस्मितमध्यतः॥अरुंतंतुधकतुषे
जातेबिल्वःछिन्नंस्तदाशिवः॥२०॥ तदुद्भूतमभूल्लिंगंदृष्ट्वासंपूज्यतेसुराः॥ हरिणागर्वमुक्तेन
वल्मीकेशंमहेश्वरं॥ २१॥ ॥ विष्णवाद्याः॥ ॥नमोवल्मीकेशायबवरकाकोदरफणालसन्मौले
शंभोहरिहरविधींद्रार्चितपद॥प्रसीदेशानंगज्वरहरहरगावाघसुरतावतांत्वत्पादाब्जेविनरभवभ
क्तिंपशुपते॥२२॥ तत्र [illegible] श्रीपार्वतीशाख्यंलिंगमस्तिचिरंतनं॥ पार्वत्यापूजितंदृष्ट्वानतंसंस्तुतका
मदं॥२३॥शर्ववेदशिखरस्तुतदेवगर्वस्वनाशाकलाखर्वसुरवप्रदायिन॥मल्लिंगपूजकजनाव
नापावनेशदेवेशमामवविभोशिवपार्वतीश॥ तत्रैवगणनाथेशोगणपेनार्चितःस्तुतः॥गणेश्वरे
श्वरंलिंगमगण्याघविनाशनं॥२५॥ स्तुतनतगणवृंदंवेदवेदांतवद्यंविधिहरिहरशक्रैर्वंदपादार
विंदं॥निगमसुगमवाक्यैर्भक्तमुक्तिप्रदंत्वांप्रणतजनशरण्यंत्वांश्रयेहंगणेशं॥२६॥मयातत्रार्चितं
लिंगंदृष्ट्वास्कंदेश्वराभिदं॥पुण्यप्रदंपापहरंपूजितंनत्रसंस्तुतं॥२७॥ ॥स्कंदउवाच॥ ॥कर्पूर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूररिपुनगात्रविभोत्रिनेत्र शंभोविभोगिरिवरात्मभवाकलत्रमाामत्रपालयविभोभगवन्पवित्र
मंत्रातिरात्रफलदायकहेनमस्ते॥२८॥ विष्णुस्तत्रार्चयल्लिंगंवासुदेवेश्वराभिधं॥तुष्टावाष्टा
क्षनिंदेवंवासुदेवोमहेश्वरं॥ २९॥ ॥विष्णुरुवाच॥ ॥हेदेवदेवस्तुतवेदमहोरुसामस्तो
मैकवेद्यभवभूतपतेपिनाकिन्॥३०॥मामद्यदैत्यपरिखंडनचित्तमेवसद्योविद्योनयप्रमथशं
करमेप्रसीद॥३०॥ ब्रह्मातत्रार्चयामासब्रह्मेशानमथास्तुवन्॥ ॥ब्रह्मोवाच॥ ॥ हरहरशिवशं
भोव्योमकेशाष्टमूर्तेअवशिवदययामांपाहिवेदांतवेद्य॥ शशिधरपरमात्मन्भर्गभूतेशबिल्वी
नयनदशयुगर्क्ष्वाननोस्त्ययशंभो॥३१॥ ईशानेशंतत्रलिंगं ईशानार्चितमुत्तमं॥स्तुतंनत्वंपूजितं
चपापसंघातभेदनं॥३२॥ ॥ईशानउवाच॥ ॥नमस्तेईशानत्रिनयनमहेशानगिरिशप्रसीदाद्या
विद्यांहरहरहरापारकरुण॥ ३४॥ त्वयिन्यस्तंजातंजगदतिविचित्रंपशुपतेविधींद्रेशानाद्याःप्र
तियुगमुपास्यामभगवन्॥३५॥ सूर्यःसोमोग्निरिंद्राद्यादिक्पालागणसत्तमाः॥मुनयोमनवःसि
द्धानागाविद्याधराःसुराः॥३६॥ यथादेवास्तथादैत्यानदानद्योपिसागराः॥नपार्श्वतत्रवल्मीके
हाटकेक्षेत्रमध्यमे॥ ३७॥ तीर्थतीरेषुलिंगानिस्थाप्यसंपूज्यतुष्टुवुः॥विधिर्यदेश्वरंलिंगंदक्षेशं
तीर्थमध्यमे॥विधिर्दक्षश्वतत्रेशंतुष्टुवातेसमर्च्यच॥रुद्राणांकोटयोप्यत्ररुद्रकोटीश्वराभिधं॥
समभ्यर्च्यपरंक्षेत्रेवल्मीकेपावनेपरे॥३९॥ ॥सर्वदेवमुनिगणाऊचुः॥ ॥जयजयशिवशंभो
विश्वविश्वाधिकेशापुरहरविधिमस्तस्वस्तशास्तोरुहस्त॥प्रमथप्रमथयानःपालयेशाद्यदेवसुर
मुनिगणेशानसद्दयासारदृष्ट्या॥४०॥ ॥इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेउत्तरार्धेवल्मीक
वैभवेनामसप्तत्रिंशोध्यायः॥३७॥ ॥ श्रीस्कंदउवाच॥ ईशानकल्पेतुपुरादेवदैत्यैःपराजिताः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इंद्राद्याश्चैवदिक्पालावसुरुद्रार्यमादयः॥१॥ हृताधिकारास्त्रिदशाः दुर्दशामापिरेतदा॥बलोपबल
नामाभ्यां ~~विष्णु~~ दैत्याभ्यांविद्रुतंसुराः॥२॥ जन्येपर्जन्यनिनदैरसुरैर्बलवत्तरैः॥ वैकुंठंशरणंप्राप्ताःशा
रण्यंकमलापतिं॥३॥ इंद्रादयःसुराःसर्वेसदिक्पालामहौजसः॥ दृष्ट्वाविष्णुरमायुक्तंपूजयंतंमहेश्व
रं॥४॥ सर्पसिंहासनारूढंप्रभयाचविराजितं॥सोमास्कंदसोमधामसमानास्यंत्रिलोचनं॥ ५॥
नीलकंठंचंद्ररेखाधरंगंगाधरंविभुं॥तोरसनाभिरामंचविटंकंसुंदराकृतिं॥६॥ त्यागराजंसमुत्फुल्ल
हल्लकाधरकंधरं॥संपूज्यधूपदीपाद्यैर्नैवेद्यैर्विविधैर्हरिः॥७॥नीराज्यप्रमथाधीशमस्तुवन्परमेश्वरं॥
॥विष्णुरुवाच॥ ॥त्यागाधीशमहेशशंकरविभोत्यागेनभोगेषणाप्राप्यस्त्वंयमिनांहृदंबुजवरेसं
रक्षाप्यसन्मानसे॥हत्याकोटिनिवारिणेभगवतेस्तुत्यासुपूज्यायते॥ मत्यास्वानुभवेननेत्रनिपदं
पादांबुजंध्यायिनां॥ ८॥ धन्यानांकिलमुक्तयस्तवविभोभूयात्प्रसादेनमे॥ इत्थंस्तुवंतंविष्णुवाद्या
त्यागराजंमहेश्वरं॥रत्नराजिविराजच्छ्रीमकुटंदेवसत्तमं॥९॥यक्षराजार्चितपदंदेवराजंप्रणम्य
च॥उवाचप्रांजलिर्विष्णुंतंतदापाकशासनः॥१०॥ ॥इंद्रउवाच॥ ॥मह्यंदेहिहरेमूर्तिंसोमास्कं
दत्रिशूलिनः॥पूजयेममदेवेशाहृदयंसदयंतव॥११॥ मयिनित्यंसुदुःखार्तेबलोपबलपीडिते॥
तदिंद्रवचनाद्विष्णुस्तस्मैप्रासादान्महेश्वरं॥१२॥त्यागराजंविटंकंचइंद्रमाहतदाहरिः॥ ॥
॥हरिःउवाच॥ ॥ कालांतरेभूगतेयंभवेन्मूर्तिमहेशितुः॥केलासेतुमयालब्धापुराशंभोःप्र
सादतः॥१३॥ दैत्येभ्यःपाहिमांमूर्तिंपूजयस्वविधानतः॥त्यागराजसपर्य्यातःजयेतवजयोभवे
त्॥१४॥भुवस्तलेन्द्रपवरोमुचुकुंदोबलाधिकः॥तेनसख्यंसमासाद्यबलोपबलनाशनं॥१५॥क
र्तासिदेवराजाद्यत्यागराजप्रसादतः॥ तथेत्युक्त्वायथोदैवैः देवराजोमरावतीं॥त्यागराजंगृही

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वा स्वैरहस्येनायये। द्भुतं॥ सचाक्रस्त्वमरावत्यां देव्या सिंहासनस्थितं॥ १७॥ त्यागराजं नदन्तैः
निपूज्यमभ्यर्चयन्तदा॥ कल्हारमालिकाभिश्च धूपदीपादिभिर्निवेदनैः॥ १८॥ नीराजनैः त्याग
राजं देवराजोमुदास्तुवत्॥ ॥ देवेंद्र उवाच॥ ॥ त्यागराजसुरराजनतांघ्रे राजराजमकुटा
वभासदा॥ यक्षराजसखपक्षिराडुहपूज्यपाद भगवन्प्रसीदमे॥ १९॥ इत्थं संस्तुत्य देवेंद्रः का
लेनमहता तदा॥ बलोपबलहन्त्यार्थं मुचुकुंदमथाह्वयत्॥ २०॥ स तेनभूभुजायुद्धे देवराजसु
रैःसह॥ बलोपबलनामानौ निहत्याजौ तदा मुदा॥ २१॥ राजानं मुचुकुंदं तं पूजयामास तत्र वै॥
मुचुकुंदस्तदाप्राह प्रांजलिः पाकशासनं॥ २२॥ ॥ मुचुकुंद उवाच॥ ॥ प्रणोमि त्यागराजं मे पूजा
र्थं शक्र देहिमे॥ मुचुकुंदवचः श्रुत्वा नासिह्रुत्त मनाब्रवीत्॥ २३॥ शक्रो देवैश्च गुरुणा ददामि तव
शंकरं॥ तथेत्युक्ता स राजापि शक्रेण परिपूजितः॥ २४॥ विश्वकर्माणमाहूय शक्रस्तत्र रहोमु
ने॥ षट्त्यागराजप्रतिमाः विटंकैः समकारयत्॥ ददौ रुद्रस्तदा हस्ते परि त्यागमुहुर्मुहुः॥ २५॥
तेन कोपपरीतेन त्यागराजं प्रयाचत॥ रुद्रस्य प्रहस्यतं प्राह देयं मे हि दैतामिति॥ २६॥ गुरुरुवाच॥ ॥
विष्णुनापि पुराप्रोक्तं भूलोके स्थायिनी त्वियं॥ मूर्तिः त्यागाख्य काशं भो मात्रत्वं संशयं कुरु॥ २७॥
मुचुकुंदश्च संपूज्य त्यागराजं पदे मुदा॥ स षट् त्यागेशमूर्तीश्चारहीत्वा भूतले नृपः॥ २८॥
स्थापयामास परितस्थानेषु च महेश्वितुः॥ स कालसंज्ञेस्थाने तु वेदारण्ये नलेश्वरे॥ २९॥ कहोले
श्वत्रिकं टेशात्रियास्मोहर प्रपूजयन्॥ त्यागेशं हाटकेशान्येक्षेत्र वल्मीक दक्षिणे॥ ३०॥ स्थानं कृत्वा
शिवाकारं रम्य प्राकार गोपुरः॥ दिव्यसिंहासनासीनं पुल्लहल्लक धारिणं॥ ३१॥ मरगटंकधरं सोमंपा
दपानेहि किंकिणी॥ संपूज्य मुचुकुंदोत्र त्यागराजं प्रतुष्टुवे॥ ३२॥ ॥ मुचुकुंद उवाच॥ ॥ हेत्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गराजगिरिराजसुताकलत्र पाहि त्रिनेत्र द्विजराजकलाधरेश॥ यक्षाधिराजसखपक्षिसुराजवाहने
शाब्जपूज्यविनतामरराजपाहि॥ ३३॥ वल्मीकेशारवायुकोणनिहितयदानदपस्यपतारा जदाहच
तुष्टयेषुविधतारुद्राक्षसन्मालयिका॥ प्रसन्नं हररुद्रपादनिरतासाफाल्गुनेफल्गुभेसादेवीक
मलांबिकाभगवती शार्वार्चिकाश्रीपुरे॥ ३४॥ ॥ श्रीस्कंद उवाच॥ ॥इत्थं श्रीत्यागराजं विधिहरि
हरिणापूजितं त्रिकंटकाख्यक्षेत्रस्थाप्यसभूपतिः ▪ परयाभक्त्यामहेशार्चनं "कृत्वामुक्तिमवापभ
क्तिनिवहैः संसेव्यपादांबुजं ध्यायंस्तत्स्थलवैभवेन सतदा भूभृत्कुमारीसखं॥ ३५॥ ॥ इतिश्रीशि
वरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे त्यागराजवैभवे अष्टत्रिंशोध्यायः॥ ३८॥ ॥ श्रीउग्रायनमः॥
श्रीस्कंद उवाच॥ नदीशान्याराममगयास्थाने तीर्थेगयाभिधं॥ तस्मिन्तीर्थे पुरारामो ददावंजलिजं प
यः॥ १॥ पितरं स्वंसमुद्दिश्यप्लक्षमूलेतु पिंडदः॥ तदास्य पितरस्तत्र गः राममूचुस्तदामुदा॥ २॥ ॥
पितरऊचुः॥ ॥गयाधिके तीर्थवरे अददाय तिलोदकं॥ वटद्दिके प्लक्षमूले अस्मानुद्दिश्य पिंडदः॥ ३॥
गयाछतगुणं चात्र पिंडदानं च तर्पणं॥ अत्र रामगयास्थाने कुर्वतां पुत्रताभवेत॥ ४॥ काशीवल्मीक
मुख्येषं गदाशीर्थमिदं तदा॥ प्रयागं चत्रिमंगाख्यं तत्तीर्थं तत्रिवेणिका॥ ५॥ तदा पितृवचश्श्रुत्वा
तुष्टानत्वाथ शंकरं॥ संपूज्य तत्र देवेशं रामोरामगयेश्वरं॥ ६॥ ॥ राम उवाच॥ ॥ नमोदेवा
धिदेवाय भक्ताभीष्टप्रदायक॥ पाहि मां रूपया शंभो मामुध्दर महेश्वर॥ ७॥ तत्र रामाय देवेशः प्रसा
दं कृतवांस्तदा॥ तद्दाय यांत्रिमंगाख्यं प्रयागसदृशं स्थलं॥ ८॥ तत्र गत्वा नरः स्नात्वा वेणीतीर्थे
चमाधवं॥ वैशाखमासे देवेशमुमाधवपदार्चकं॥ ९॥ विष्णुराराध्य श्रीवांछीपुराधीशप्रसादतः॥
तत्रिमंगके स्थाने श्रियाः पाणिमथाग्रही तु॥ १०॥ सन्निधौ समहेशस्य श्रियाभूम्याहरिर्हरं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तुष्टाव देवदेवेशं संपूज्य तत्पश्चिमे स्थितं ॥११॥ करवीरपुरे शानं हरिस्तत्र समार्चयत् ॥ माधव उवाच ॥
शंभो भर्ग विभो प्रसीद भगवन् त्वां वै समर्च्याद्य शान् ॥ वल्मीके निवसामि चात्र गिरिहितेस्थाने मदी
ये श्रिया ॥१२॥ तत्क्षेत्रे शार्यक तापिलिंगस्य मीताः भ त्वादनीशे वनः ॥ त्वद्देहो भवितो महानपघुप
ते तस्माद्दहाम्यत्र वै ॥१३॥ श्रीवल्मीकात्ततः प्राच्यां वदरीवनसंज्ञकं ॥ स्थानं तत्पावनं पुण्यं वस
तां पुण्यदं नृणां ॥ तत्र पावनतीर्थे च शिवाग्रे पापनाशनं ॥ तत्र तीर्थे नरः स्नात्वा दृष्ट्वाक्षय्यमहेश्वरं ॥
॥१५॥ वनमूलस्थितां देवीं भद्रकल्याणनमर्चितां ॥ संपूज्य क्षयलिंगं च द्यनसामुच्यते नरः ॥१६॥
पुरा सुभद्रो राजर्षिः चक्रे क्षय्येश्वरस्य हि ॥ प्राकारं गोपुरं तत्र मंडपाश्च तदा त्मना ॥ १७ ॥ संपूज्य पू
जादिभिरेस्तुष्टावाक्षयनायकं ॥ ॥ सुभद्र उवाच ॥ अक्षाक्षय्यफलप्रदाक्षय विभो अक्षि सरोरुहा
र्चितपदस्वामिन्म डानीपते ॥ त्वद्भक्ते परिपालादिदाननिपुणकस्ते समस्तेन मः ॥१८॥ सुभद्राय हरो
मुक्तिं प्रादाद क्षय्यनायकः ॥ नदीशान्यां तु नागेशो नागेशाः पूजितस्तदा ॥१९॥ ॥नागा ऊचुः॥ ॥ना
गानागाजिनहार वासशंभो ननामा तेक विमग्यपादपद्म' द्विजराजकंधर प्रपन्न लवनागान्मुण
तोऽस्मि शंकर त्वां ॥ तत्प्राच्यां चिल्कलीशानः वासवेन समर्चितः ॥ २०॥ तीर्थ वासवसंज्ञं तु शंभोरग्रे
सुपावनं ॥ वासवोऽत्र समभ्यर्च्य हृद्यमेवमहेश्वरः ॥ २१॥ देवप्रसन्नो भव पार्वतीपते ॥ तस्मै प्र
सन्नो देवेशः वासवाय पुरा मुने ॥ ततः प्राच्यां शिवस्थानं कायारोहणसंज्ञितं ॥ प्राक्सागरतटे पुण्यं
दर्शनात्पापनाशनं ॥२३॥ कायावरोहणं तीर्थं मनोदेहस्य पापहं ॥ तत्र स्नात्वा नरो दृष्ट्वा देवं काया
वरोहणं ॥२४॥ संपूज्य स्तुवतां तत्र मुक्तिरेकेन जन्मना ॥ हुंडो नाम्ना गणपतिर्देवं कायावरोहणं ॥
२५॥ संपूज्य तत्र तुष्टाव भक्तियुक्तेन चेतसा ॥ ॥तुहंड उवाच॥ ॥कायावरोहण विभो धृतशूल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पाडेभ्रोद्दंडदंडधरपर्दविनाशकारिणे॥मालावलीकलितपन्नगगणधारिणे।पाहीशमामवनिशें
द्रकलाविधारिणे॥२६॥ तुहंडायप्रसन्नेशोगाणपत्यंददेहरः॥ तद्दक्षिणेपुण्यवनंपुण्येशंपुण्यती
र्थदं॥२७॥ तत्रपुण्यवनाधीशंमुनयःपूज्यतुष्टुवुः॥ ॥मुनयऊचुः॥ ॥कलधौतनगाग्रवासशं
भोधनहारमहोरगेंद्रपाहिअवनःशरणंप्रपन्नभावानविभवेनेवभवेन्मतिःसदानः॥२८॥ ॥
इतिश्रीशिवरहस्येउग्राख्येसप्तमांशोत्तरभागेशिवस्थानवैभवेएकोनचत्वारिंशोध्यायः॥३९॥
॥श्रीउग्रायनमः॥ ॥श्रीस्कंदउवाच॥ तत्पश्चात्स्थानमस्तीहहिडिंबवनसंज्ञितं॥ हिडिंबेना
नर्चितोदेवःबलंप्रादाच्चतस्यहि॥१॥ ॥हिडिंबउवाच॥ ॥ बलप्रमथनप्रभोबलवकारिदेवा
र्चितप्रसीदत्वयधुनाममसदेवबाहोर्विभो॥गिरीशानवपूजनेनबमुलिंगसंदर्शनेप्रदेहिमन्नि
मुत्तमांपुरहरावशंभोनमः॥२॥ तत्पश्चिमेकांचनाख्यस्थानंपुण्यंतन्मुक्तिदं॥ कांचनंतीर्थमस्त्येकंकां
चनेशोधनःपुरा॥३॥ तत्रविप्रस्त्रिधावाहुःसंपूज्येशमथास्तुवत॥ ॥त्रिधाबाहुः॥ ॥हेशंभोत्रिपु
राध्यकांचनगिरिःसद्वंदनेपाहिमा॥मुग्धेशानकपाहिनःत्रिनयनापारायपारायेन॥४॥ योमायस्थिति
दिग्वसायमहसेभूयोयसीम्नेनमः॥ सामस्तोमगतिप्रियायभवनेकुधेटजनीजानये॥ त्रिपुंडरीकंतत्प
श्चात्स्थानंभक्तभयापहं॥५॥ पुंडरीकेश्वरःस्तत्रपुंडरीकंसुतीर्थदं॥ तत्रदेवगजोनाम्नापुंडरीकेर्चिय
त्स्तुवत्॥६॥ ॥पुंडरीकउवाच॥ ॥ हेपुंडरीकाक्षसमर्चितांघ्रेयकर्पूरपुंजामलदेहशंभो॥त्रिपुं
डरीकेमुनिभिःसमर्चितप्रसीदविश्वेश्वरमामवाद्य॥७॥ तद्दक्षिणेस्थानवरंत्रिपांडरमाहयं॥
त्रिपावनंतत्रतीर्थंलिंगंतत्रत्रिपांडरं॥८॥ त्रिपावनेशांरवतीर्थेस्नात्वाद्दस्वेश्वरंमुनिः॥जाजलिःपू
जयेच्छंभुंप्रांजलिःस्तौतिशंकरं॥९॥ ॥जाजलिरुवाच॥ ॥शंभोत्रिवाप्रवरपाहिमहेशशाश्वद्धि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्याधिके शानवनां डवदनदृष्टिः॥ नान्यंस्मरामि जगदंड कथामकां डेदेवाद्युदं डयदृशाप्यपाहिदेवा॥
॥१०॥ तत्राच्यांस्थानमस्त्येकं दृष्टं ज्ञानप्रदायकं॥सरोदेवप्रियंनामपावनंपापनाशनं॥११॥चंद्रभा
गासरित्तत्र दक्षयातपुरीश्वराः॥देवस्तत्रार्चितो देवैः दक्षपक्षान्वितैःपुरा॥१२॥ विश्वेदेवाऽश्विनः
सूर्यावसवोर्चयनशिवं॥ दक्षवानपुरीशानं देवदेवं समाह्वयन्॥१३॥ दक्षपक्षश्चयागोत्थैः तस्मिन्स्था
नेसमापयन्॥ ॥देवाऊचुः॥ ॥ नमस्तेमहादेव दक्षाध्वरात्मप्रसीदेशविश्वेशशश्रीव्योमकेश॥
जगत्कारणाशास्यदेवेशपाहि प्रसीदेतिआराः क्षमस्वेतितेप्रार्थयंति॥१४॥ देवोपितत्रदेवा
नांप्रार्थनापरितोषितः॥तुष्टस्तदागोहिशालेवृषवाहः क्षमांदधौ॥१५॥ तत्राच्यांवाटनारण्यंस्था
नंशंभोःप्रियंकरं॥ तत्रदेवीसमाराध्य पाटीनससमाह्वया॥१६॥ऋषयः पूजयामासुः तत्रवारण
केशरं॥तुष्टुवुः परयाभक्त्या देवंचंद्रकलाधरं॥१७॥ ॥मुनयऊचुः॥ ॥नमस्ते देवेशत्रिपुरहरशं
भोत्रिनयनप्रभो विश्वाधीशामरवरत्रिशूलिन्भवहर॥प्रसादं सद्योनं प्रकुरुतरदुःखंहरविभोगिरीं
नाथार्चितपदकमलामोदभ्रमरतः॥१८॥ तदुत्तरे त्रिनयनेस्थानंशंभोप्रियंतदा॥तत्रवन्ह्यर्कसो
माद्याः तपश्चक्रुर्महत्तरं॥१९॥ शिवः फालाक्षसिध्यर्थं देवंत्रिनयनेश्वरं॥ संपूज्यतुष्टुवुर्देवं सोम
सूर्यानलास्तदा॥२०॥ ॥सोमसूर्यानलाः प्रपद्यामशंभोपदाब्जंतवाद्यंभवेशानउग्रेश्वरा
वप्रभोविश्वनाथ॥उमानाथहेमन्मथारेपुरारे भवत्फालनेत्रेवसामोभवाय॥२१॥ तत्रत्रिनयने
शानः सोमसूर्यानलाक्षकान्॥तांश्चकारतदातुष्टः शिपिविष्टोंबिकासखः॥२२॥ तस्मात्पश्चा
न्महत्स्थानंश्रीमद्दानपुरीतिच॥आत्मेशोभगवान्देवः देवीयोगांबिकात्रहि॥२३॥ तत्रागस्त्या
करुद्राद्याः संपूज्यायमतुष्टुवुः॥स्नात्वातेसूर्यसरसिपापनाशेतदंभसि॥२४॥ तस्मिन्मुक्तिप्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देस्थाने देवावानपुरीश्वरं॥ माणिकवाचकोनाम्ना भक्तवर्यो महेश्वरं॥ २५॥ कदंबवननाथस्य पां
ड्येशस्य धनेनहि॥ प्राकारमंटपं तत्र गोपुराण्यप्यकारयत्॥ २६॥ साधके शाविनाशाय तत्र देवो
निरंजनः॥ भक्तसिध्यर्थमत्रैव पांड्यायाश्वानदर्शयत्॥ २७॥ ॥श्रीस्कंद उवाच॥ ॥भक्तव
श्यो महादेवः हस्तिनाथो महेश्वरः॥ माणिकवाचकेनेत्थं पूजितोसंस्तुतस्तदा॥ २८॥ ॥देव
मुनय ऊचुः॥ ॥अंभोजोद्भवलोचनप्रभृतिभिः संसेव्यपादांबुजं॥ देवंत्वांतु निरंजनं सुखकरं
योगांबिकानायकं॥ विश्वोत्पत्तिविधानपालनपरं गंगाधरं शंकरं विश्वाशास्यमुमासखंभवहरं
त्वांनोनुमः शंकरं॥ २९॥ ॥ इति श्रीशिवरहस्ये सप्तमांशे उग्राख्ये उत्तरार्धे शिवस्थाने वेभवेवा
नपुरीश्वरवेभवनाम चत्वारिंशोध्यायः॥ ४०॥ ॥ श्रीउग्रायनमः॥ श्रीस्कंद उवाच॥ ॥ त
दक्षिणे पांड्यपुरीनाथः सुंदरनायकः॥ तल्लिंगं सुंदरेशाख्यं पांड्यसुंदरपूजितं॥ १॥ स्तुतं च सर्व
भावेन तत्स्थानं सर्वकामदं॥ पांड्यतीर्थे नरः स्नात्वा दृष्ट्वा सुंदरलिंगकं॥ २॥ सुंदरेशं नमस्कृत्य स्तु
वन्पांड्यस्तवैर्नरः॥ सर्वान्कामानवाप्नोति पापैः सर्वैः प्रमुच्यते॥ ३॥ ॥पांड्य उ॰॥ सुंदरशंकर
पुरहर भवहर गरधर मगकर पाहि विभो॥ तव नतिस्तुति मतिं मम शिव देहि त्वदीय सुभक्तिं ते नम
वार्णवतारणमेवानन्यप तो भव देहि॥ शिव मुनिमानसवास सदा वसदा शिवशंकर पाहि विभो॥
॥५॥ तत्रानीचां शिवस्थानं पावनं पापभेदनं॥ ख्यातं हन्मुनिकोशाख्यं हत्कोशांतर्भवं मुने॥ ६॥

तत्र मंगलतीर्थं च स्नानस्य तां मंगलप्रदं॥ मंगलांबामंगलेशो भक्तमंगलदायकौ॥ ७॥ दृष्टो मंगल
दो देवो नराणां तत्र वासिनां॥ रहस्यं तांडवं चक्रे शंभुरादिचिदंबरे॥ ८॥ तत्र नित्यं महेशोत्र दृष्ट्वा
संपूज्य शंकरं॥ मंगलांबामंगलेशं शंभुं रत्नसभानटं॥ ९॥ तुंबुरुर्मुनयो देवास्तत्र रत्नसभांपतिं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥मुनयऊचुः॥ ॥ नमोस्तु ब्रह्मांड स्फुटननटनन्नत्तादिदिन द्रणत्पादाब्जोत्थप्रतिहतिभुवस्ताण्डवप्रसः।
ड्वपराः॥ स्तुवंनेनेते देवाः प्रणवगतसाशार्थे महिता स्तवेशानाः प्रायंवचनमनसा हे स्मरखवराः॥
१०॥ नागानागानगास्तप्रकलकस्तलदाश्वदलमहीविर्नः स्माकस्मास्तोप्रशिथिलभयादोरुशिर
सः॥ अहोमंगल्यनो नटपदवीक्षानुस्मरणाः शरण्यपादाब्जं शिवभवदरण्यमधुना॥ शंभोमंगल
मंगलास्मरविभोत्वां नोनुमः शंकरं॥ ११॥ त्वत्पादाब्जविलोकिनां प्रतिपदंस्यान्मंगलं सर्वदा॥ तस्मा
न्नः करुणालयावभगवन् हृत्कोशमध्यांतरे॥ माराशेन शाकरण्यस्फुरस्तंशंकरावासिनः॥१२॥
तत्रतीर्थां मतंगेशंनाम लंगमुनिनार्चितं॥ मतंगतीर्थे तत्रैव पापवमानं स्नास्यतां न्तर्णा।मतंगः पू
ज्य तत्रैव तुष्टावाथ प्रणम्य च॥ १३॥ ॥मतंगउवाच॥ ॥नमस्ते मातंगत्वचविहितवासः पशुपते
कृपाराशे शंभो सुरनिकरवंद्येशा भगवन्॥ नचस्पीनांदृक्षिं वितर हरपापंमगधरत्वदीयंलिंगंमेहृ
दयकमले तिष्ठतु चिरं॥ १४॥ मतंगेशो मतंगाय तस्मिन्स्थाने प्रसादकृत॥ तदुत्तरे वसंतेशो वसंते
नसमर्चितः॥ १५॥ संस्तुतः कामहरणः वसंतेतीर्थतीरके॥ ॥वसंतउवाच॥ ॥ वसंतेशो संतोहृ
दि त्वां महेशां सदा भांतमाराकुमाक्रांतमीशं॥ नितांतं प्रकाशं जगत्सारभूतं नमस्ते प्रपद्ये मुदा
ध्येव शंभो॥१६॥ तद्दक्षिणे च गोकर्णं दक्षिणं पावनं परं॥ गिरिशो गिरिमौलिस्थः अथो गोक
र्णनायकः॥ १७॥ करंजेन तपस्तप्तं लिंगमप्रादुर्भवतदा॥ तत्र लिंगं करंजोपि दृष्ट्वा गिरिशिरो
गतं॥ १८॥ गोकर्णेशमथस्नातोसंपूज्याथस्तुवन्मुनिः॥ ॥करंजउवाच॥ ॥ गिरीशागोकर्णनिवा
सशंभो दक्षाध्वरध्वंसकदेवदेव॥ संस्तोमि हरिकाजिनवासगोनगोभगिगर्भास्थितं पाहि मां ह
र॥ १९॥ तत्र दक्षिण गोकर्णे करंजेनार्चितः शिवः॥ तद्दक्षिणे मरुदीशः मरुद्भिः पूजितो हरः॥२०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर०७ मारुतं परमं तीर्थं पापखंडहरं त्वणां॥ ॥मरुत ऊचुः॥ ॥नमस्ते मरुदीश रूप शंभो संप्रसीद प्रसादं
कुरुष्वात्र संवासिकामान प्रपूज्याधुनामोऽस्मं मह्यं देहि त्वं प्रपन्नो न सोऽदे ज्जनेऽहि। मरुतां दे
४७ वदेवेशः प्रसादं तत्र चाकरोत् तमथ॥ तत्प्राच्यां दुंदुभीशानस्तीर्थं दुंदुभिनामकं॥ दुंदुभिर्गणपस्तत्र
संपूज्यास्तुवदीश्वरं॥२२॥ ॥दुंदुभिरुवाच॥ ॥नमो दुंदुभ्याय क्षितिरथपरस्थाय महते अ
पर्णानाथाय प्रमथपतये चांतकभिदे॥ भजामीशानं त्वां श्रुतिशिखरवेद्यं नवप्रदं भजन्मुलोभू
याच्छिवतर शिवार्धांगकम्पते॥२३॥ ॥इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे शिव
स्थानवैभवे एकचत्वारिंशोऽध्यायः॥४१॥ ॥ श्रीउग्रायनमः॥ श्रीस्कंद उवाच॥ ॥तत्प्राच्यां सो
मनाथाख्यं स्थानं तीर्थं तदाख्यकं॥ तत्र स्नात्वा नरो दृष्ट्वा सोमं सोमेश्वराभिधं॥१॥ सोमवारे विशेषे
ण कार्तिके शिवलोकभाक्॥ सोमस्तत्रार्चयामास तुष्टाव शंभमहेश्वरं॥२॥ ॥सोम उवाच॥ ॥नम
स्ते सोमेशात्रिपुरहर शंभो त्रिनयन प्रसीदेशानाद्य शशिधरकलाचूड भगवन्॥ त्वयैवेत्थं विश्वं सु
रसुत्वर्पताक्स्थिरं भव ज्ञानं स्थितमिदमखंडे त्वयि शिवे यथा राज्ये सर्वोस्तु निवरविलंभानि च वि
भो॥३॥ तत्प्राच्यां देवतीर्थाख्यं देवेंद्रेश्वरमुत्तमं॥ तत्र संपूज्य देवेशं स्नात्वा सरसि पावने॥४॥ मरु
त्कृतेन पापेभ्यो मुक्तस्तत्राभवद्धरिः॥ देवेंद्रेशं स्तुवन्भक्त्या कृतांजलिपुटो हरिः॥५॥ ॥देवेंद्र उ-
वाच॥ ॥नमस्ते रुद्रेशात्रिपुरहर मन्यो पशुपते पिनाकं हस्ते ते हरि शरमहादेव भगवन्॥ प्रसादं श्रीशिव
मे शंभो कुरु हर रुपाधि दृढतरं मृडस्त्वं नाथस्त्वं मृडय नव भद्र स्तुति वचः॥६॥ इत्थं देवं स्तुवन् शक्रः
प्रसादं लब्धवान्हरात्॥ तदाग्नेय्यां चरुसरं देव्यास्थानं नु पावनं॥७॥ यत्र देव्या सनिहतो महिषो
देवकंटकः॥ नवपाषाणमूलात्तु सेनोऽस्तीरे मुनीश्वराः॥८॥ त्रिषष्टि सप्तस्थानानि मुनिभिश्चार्चितो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हरः ॥ शंभोः प्रियकराण्येव अनंतशायनावधि ॥ ९ ॥ नरनारायणस्थानप्रभावो मधुरावधि ॥
मानभूतं दक्षिणतीरताम्रेश्वरदक्षिणे ॥ १० ॥ स्थानानि देवदेवस्य हालास्यान्नरत्नः शतं ॥ पूजिता
नि सुरैस्तत्र मुनिभिः संस्तुतानि च ॥ ११ ॥ नरैर्दृष्टानि पांड्ये वै सद्यः सिद्धिप्रदानि च ॥ हालास्यप
श्चिमे कन्यातीर्थावधिः मुनीश्वर ॥ १२ ॥ स्थानानि च त्रिषष्ठीनि अनंतशायनावधि ॥ देवासुर
मुनिश्रेष्ठैः पूजितानि स्तुतानि च ॥ १३ ॥ केरलेषु तु शंभोश्च स्थानानि मुनिसत्तम ॥ वैनायकान्य
थाष्टौ वा स्थानानि सुमहान्त्यपि ॥ १४ ॥ भगवत्यास्तथा पीठं सुरासुरसमर्चितं ॥ शास्तुस्तत्पश्चिमे स्था
नं गजशैलस्य पश्चिमे ॥ १५ ॥ कलाभगवतीशास्ताकेरले चिह्नितं मुने ॥ महेंद्रमलादासह्यं समप्रति
सच्छिवस्थलं ॥ १६ ॥ तदुत्तरे च गोकर्णं तत्प्राच्यां मेडपस्थलं ॥ सुब्रह्मण्यं ममस्थानं सर्वेषां काम
दायकं ॥ १७ ॥ तत्प्राच्यां सप्तषष्ठ्यानि शिवस्थानानि सत्तम ॥ मुनिदेवार्चितान्येवं आगंगाधररंग
के ॥ १८ ॥ श्रृंगेरके सरस्वत्याः पीठं तस्माच्च पूर्वतः ॥ पश्चिमे दक्षिणोदक्षु स्थानानां च चतुःशतं ॥ १९ ॥
देवर्षिपूजितान्येव शंभोः स्वायंभुवानि च ॥ स्कंदस्थानं च तत्रासीत् समानफलनीस्थलं ॥ १९ ॥ स्त्री
नां कामदं मे यमकूलानां विशेषतः ॥ यस्नाति मनुजस्तस्य न स्युः पापभयादयः ॥ स्थानानां चैव
नो पापं तेषां तीरेषु सत्तम ॥ शतत्रयाधिकान्येवं शंभोः स्थानानि वै मुने ॥ २१ ॥ शिवार्चनागत
स्यैय बिल्वस्थानं तु विंशतिः ॥ चित्राचित्राग्रपर्णा च पुण्या वेगवती नदी ॥ २२ ॥ पापनाशात्समुद्भूता
सरसः सागरंगमा ॥ नाम्ना चित्रा च संभूते तयोः सागरसंगतः ॥ २३ ॥ पुण्यं पापापहं सद्यः स्नास्य
तां मारीशीर्षके ॥ ताम्रपर्णी त्रिधा स्नानं पापसंघनिवारणं ॥ २४ ॥ हालास्यं वेणुविपिनं शुचीन्द्रपा
पनाशनं ॥ कुंतालं त्रिमहत्स्थानं मेधत्पुण्यासमाह्वयं ॥ २५ ॥ गुरव्यां नेतनी तीरे सशिवस्थानं वै भ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वं ॥ तोताद्रिवासीविष्णुश्च अनघारव्यमुनीश्वराः॥२६॥ ॥स्कंदउवाच॥ ॥एषस्थानवरेषुदे
वमुनिभिर्गंधर्वयक्षोरगैः॥ भक्त्यापूजितएवशंकरमहादेवोत्यलिंगेषुवै॥ तेषांमुक्तिमभीष्टम
र्थमखिलंभादात्कृपांभोनिधिः॥प्रत्येकंनचवक्तुमलमहंमाहात्म्यमीशास्यहि॥२७॥ ॥इतिश्री
शिवरहस्येउग्रारव्येसप्तमांशेउत्तरार्धेशिवस्थानवर्णनंनामद्विचत्वारिंशोध्यायः॥४२॥ ॥श्री-
उग्रायनमः॥ ॥श्रीजैगीषव्यउवाच॥ ॥हालास्यहालास्यमदनंमदनांतकरप्रियं॥ इतिश्रुतंम
यापूर्वंतस्मैकथयसत्तम॥१॥सहेमिर्मुनिभिर्देवैःगणेस्तारकनाशन॥ हलास्यमहिमांश्रोतुंसमु
त्कंठतिमेमनः॥२॥ नीलकंठकथाहर्षैः हर्षयास्मान्षडानन॥मुनिशलिंविनापख्वानीलकंठंतुका
विता॥ ३॥ ॥श्रीस्कंदउवाच॥ ॥ततस्यजैगीषव्यस्यवचसानंदिनांतरः॥ उवाचषण्मुखोवावी
श्यहालास्यक्षेत्रवैभवं॥४॥ ॥स्कंदउवाच॥ षण्मुखोवावीश्यहालास्यक्षेत्र॥ शृणुपांड्येषुपुण्यं
तत्थालास्यंक्षेत्रमुत्तमं॥ क्षेत्रंगजमितिप्रोक्तंशिवेनमनसाततं॥५॥ वेगवत्यपिचानीतानदीपाप
भयापहा॥भूलोकेशिवलोकेतान्मधुरापुरमित्यपि॥६॥ चतुःषुंडपुरंचेतिकदंबविपिनेत्विति॥
मनसामानसप्रख्यंसरःशिवविनिर्मितं॥७॥ हेमपद्माकरंनाम्नातीर्थंतिष्ठतिपुण्यदं॥ ततीरेष्टगजे
युक्तंगर्भगेहंमहेशितुः॥८॥विश्वकर्मास्वशिल्पेनविनिर्मायददौशिवे॥ मंटपानांचदिव्यानांप्रा
कारणांतुगोपुरं॥९॥ गराजद्वषभैर्देव्यामीनाक्ष्याश्चालयंव्यधात्॥ कलधौतसभांतत्रचका
रमसभापतेः॥१०॥ यांप्रार्थनत्यमकरोत्तदादेवःसभापतिः॥ हालास्यसुंदरोदेवःलिंगराजोतमस्थि
तः॥११॥ तत्रवासंमुनिश्रेष्ठाःरोचयंतितपस्विनः॥भृगुमरीचिःकण्वाथगौतमोगस्त्यएवच॥
१२॥वसिष्ठोविष्णुरत्रिश्चजमदग्निःतथांगिराः॥ हेमपद्माकरेस्नात्वाभस्मदीप्यत्त्रिपुंड्रकाः॥१३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्राक्षमालाभरणाः रुद्रपंचाक्षरादराः॥ कदंबसुंदरं लिंगं पूजयंति तपस्विनः॥ १४॥ त्रिका
लं बिल्वपत्रैश्च फलमूलानि वेदनैः॥ स्तुवंति भक्तिपरितास्तत्र श्रीसुंदरीश्वरं॥ १५॥ सानंदमिंदु
शकलाभरणं भक्तनोषणं॥ ॥मुनय ऊचुः॥ ॥हालास्यसुंदर विभो त्रिधामचूड हेमाब्जिनीत
टगतोरुसहेमकुंभ। मध्यस्थसौधविलसस्थिवमूललिंग गंगोत्तमांगधृतहारभुजंगशंभो॥ १६॥
नमालयाश्रुसुहृशाभगवन्ननाख्मः ब्रह्मादित्रिदशानतांघ्रिकमलं पापौघमूलानलं त्वां शंभुधृतह
स्तमृगमगजाकांतं च कालानलं॥ त्वां गंगाधर मातास्मः मुनयो हालास्यलिंगे सदा धन्येनाक्षियुगे
न सेवनपरांस्त्वं सुंदरालोकय॥ १७॥ इत्थं स्तुवंति मुनयस्तत्र हालास्यसुंदरं॥ अगस्त्यस्तत्र निग
मा तपसा तोष्य शंकरं॥ १८॥ कर्पूरसुंदरं देवं तद्दिवाहावलोकनं॥ कर्तुं तत्र स्तुवन्नीशमुवाचेत्थं
मुनीश्वरः॥ १९॥ ॥अगस्त्य उवाच॥ ॥लीलार्धांजलिमेकमेव कुसुमं साम्राज्यलक्ष्मीप्रदः फु
ल्लात्रोषचराचरात्मकजगत्स्थानेषु मूर्तैर्विभो॥ फालाक्षानलदग्धमन्मथगुरोस्यतां संततं हालास्ये
शाकृपाकटाक्षलहरीमामीश्वराव्याद्भुतं॥ २०॥ बालादित्यसहस्रकोटिसदृशोरुवेदवाक्यापगा
वेलाभूमिविहारनिपुणत्यब्रधाने वरस्थनीरे श्वरा॥ हालावण्यकवित्वभूरिसुरवदाश्रायेन सेनतं नेहा
लांकीललपितयाव कानिलनभं चंद्रार्कयज्वा मते॥ २१॥ कीलानेकसहस्रसंकुलशिरवास्तंभे
रमां रात्तिमे॥ शालाधन्वचरनयनैश्रुतप्रदानोधन हाला ॥ श्रीहालास्यपतेवदेवमुनिहृ
संवासगीतापदानभूतेः स्त्वं कंध्याधिकोटिभक्तरमनोभार्यपिधं केरुह ध्यानवर्गप्रदा॥ २२॥ संफु
ल्लवामलपद्महस्तवरदत्रायतमांसंलनं हला॥ हेलानारदगीतितुष्टहृदयं श्रीमत्कदंबाततीना
थं चारण्यं सतां॥ २३॥ वंदेयं चकनोमिनं पशुपतिं पंचत्वनाशं भजे॥ ॥स्कंद उवाच॥ ॥हालास्ये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 शोपितुर्शेसुंदिरन्निभगल॰ स्तं तदाप्राह देवीगस्त्वंभक्तलभं मदीयविविधालीलामयंचंकुरु॥ अ
त्रैवासुगिरींद्रजापरिणयंद्दष्ट्वासिन्नतं मम घ्यत्यस्त कलधौतसार सदसिधन्यः सुरवंचारचहि॥ २८॥

॥ इतिश्रीशिवरहस्ये उग्राख्येसप्तमांशे उत्तरभागे हालास्यवैभवे॰॥ ४३॥ ॥श्रीउन्नापनमः॥
॥ श्रीस्कंद उवाच॥ ॥मुनिर्हालास्यनाथस्य लीलासारकथारसैः॥ लोकंपापैकबहुलं मुक्तयेसमची
करत्॥ १॥ मलयध्वजकन्यायाः जयंदत्वालकेषु च॥ पाणिग्रहंसुरैस्तत्र अपश्यत्कुंभभूस्तदा॥
२॥ कलधौतसभामध्ये व्यपश्यत्तं आनंदविभोः॥ दृष्ट्वासहस्रनाम्नैश्शंतुष्टावघटजोमुनिः॥ ३॥ तत्रमु
नेप्रवक्ष्यामि हालास्येशास्यतत्त्वशृणु॥ रणांकवंशसंभूतो घृतेनपशिपूजकः॥ ४॥ चंडांशुरिववैक्रो
धेखंडितारातिमंडलः॥ सुधाकरइवालापैः सज्जनानांमुदंव्यधात्॥ ५॥ उदधीनिवगांभीर्ये धैर्ये
णनगराडिव॥ क्षमातुल्यः क्षमासारैर्विभ्राजेमुदितोयमः॥ ६॥ मलयध्वजइत्याख्यांसंदधेपांड्य
भूपतिः॥ अक्षोहिणीपतिः क्षोणीवंशीचक्रेस्ववीर्यतः॥ ७॥ तस्यैवंशासतोराज्ञोमधुरायांनपस्य
वै॥ षष्ठिवर्षाणिमेजग्मुरश्वमेधैनतोषितः॥ ८॥ प्रसादितः सभूपेनकन्यकाससजायत॥ कलाचां
द्रमसीव्यत्थंप्रावर्धतपितुर्गृहे॥ ९॥ तदंतकेतिचिरयातापूर्णचंद्रसमानना॥ तांदृष्ट्वाकन्यकांरा
जाचिंत्तस्तनींयौवनेगतां॥ १०॥ देवींमूर्तिमयींतत्रचिंतयामासकात्विय॥ कस्मैदेयामयाकन्यासुकु
मारीनरांतका॥ चिंत्तनांसुदतींबालांदृष्ट्वान्येराजसत्तमः॥ भिर्यायांतिदिपोदृष्ट्वासिंहमस्तांगजाइव॥ १२॥
तमाहवाकविनंतंनारदस्तत्रसंसदि॥ ॥ इत्थंत्वामवितंद्राकंकन्याजेनाभवत्तदा॥ अनयासैन्यभारेण
जन्यजहिनपान्सुरान्॥ १३॥ यस्याःस्यांद्दष्टिपातेनकस्यचिद्दासुरस्यहि॥ निमज्जत्येवहृदयेसत्तनो
स्याश्वतनीयकः॥ १४॥ सजामातातवभवेद्वरश्चनचापरः॥ महेशोनेवमीनाक्ष्यांसुंदराख्येनपांडयप॥ १५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राजस्तेदुहितुर्वंशः पांड्यान्पातिसकेरलान्॥ इत्युक्त्वोनारदेनागात्स्वंपूज्यरथसेनया॥१६॥ गजवाज
पदात्योघैः मलयध्वजभूपतिः॥ शरकोदंडशूलासिगदाखेटकधारिणिः॥ आताड्यदुंदुभीन्सर्वानस्व
स्वशांखंसपांड्यपः॥ सषट्पंचाशद्देशस्थान्नृपतीनजयत्स्थितौ॥१८॥ क्षयद्वीरपदार्थानोजयस्तस्या
भवत्तदा॥ तटातकांपुरस्कृत्यसैन्याभरणपांड्यपाः॥१९॥ देवेंद्राभिमुखः प्रायात्प्राच्यामिंद्रेणभूपतिः॥
जप्यंपर्जन्यवज्रैः कन्यपास्वपुरस्थया॥२०॥ इंद्रोपिनिरगात्क्षोभ्वसन्तुरगराडिव॥ ऐरावतंस
मारुह्यदेववृंदपरीवृतः॥२१॥ मलयध्वजपांड्येनमुत्पस्यक्रोधकन्यया॥ भटैरश्वैर्गजैर्मत्तैः स्यं
दनस्थैः सुदर्शनैः॥२२॥ अन्योन्यंयुयुधुर्दैवैः नराः प्रासासिपाणयः॥ चिच्छिर्बिदुर्भिदुर्देवाननरा
नपभटास्तदा॥२३॥ गजकुंभेश्वकंठेषुरथचक्रेषुधन्विनः॥ धारासारैर्धनुर्मुक्तैस्तिलशाश्वकुरुध
नाः॥२४॥ नदीः प्रावर्तयामासुर्मांसशोणितकर्दमाः॥ प्राभज्यतबलं सर्वं देवानांमनटातका॥
२५॥ इंद्रोपयोनतस्तस्थौस्वबलेनांबिका तदा॥ अग्निश्चयुयुधेसैन्यैर्मीनाक्ष्याचपराजितः॥२६॥ य
मोपिस्वभटैः सार्धं तुलायस्थोप्ययुध्यत॥ पाशीपाशाक्षिलगुडैः प्रायुध्यललदामुदा॥२७॥ नटातका
शराशारैर्निरस्तोप्यगमत्पुरीं॥ निर्ऋतिर्युयुधे देव्यामीनाक्ष्यानपसेनिकैः॥२८॥ पंचविद्याधना
राचान्सुरप्रांजलिकैः शिवा॥ निरस्यनिर्ऋतिं देवी शंखं दध्मौनृपेणसा॥२९॥ वरुणंसाजयज्जन्य
स्फकात्रेणसानदा॥ कांदिशीकोप्यपांनाथः वायुर्देव्यातदाजितः॥३०॥ कुबेरमेवमीशानम
जयत्सतटातका॥ केलासमाययौतत्रगणवंदैर्विराजितं॥३१॥ नंदिभृंगिमहाकालैःयुयुधेशूलमु
द्गरैः॥ उद्दहासंविमुंचंतीं दृष्ट्वादेवस्तटातकां॥३२॥ शिवस्यदीर्घापांगोत्थवर्षेनामनसारतः॥ तटा
तकाहृदिस्थश्वस्तनस्तन्नव्यलीयत॥३३॥ कुचौदृष्ट्वानम्रमुखीमहेशं समुदैक्षत॥ वयश्छकुसु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 मासारं देवावाद्यान्यवादयन् ॥३४॥ नटानकाशिवौ तत्र पांड्येशाश्चप्रपूज्ययन्॥ सुरा ऊचुः॥ ॥
 धन्यास्मन्नृपपुंगवश्रुतिशिरोवाक्यार्थसारेयुवां॥ मीनाक्षीहरसुंदरेश्वरविभोः धातुश्चविष्णोः सदा
॥३५॥पूज्यैः सर्वसुराधिपैश्चयुवयोरूद्वाहजं मंगलं वीक्षाप्यस्वपक्षावनेष्वनिरताः यामोद्य हालास्य
कं॥ ॥ श्रीस्कंद उवाच॥ ॥इत्थं सर्वसुरासुरैर्नृपतिना पांड्येश्वरेणेश्वरो भक्त्या प्रार्थित एव सन्त्रिज
गतामाधारभूतो हरः॥नंद्याद्यैर्गणपैः वृतो वृषवरेणागाच्च हालास्यकं तत्रैवादिमदंपती अभवतां
देवैः सुराराधितैः॥३६॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्तमांशे नटानकादिजयो नाम चतुश्चत्वा
रिंशोध्यायः॥४४॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंद उवाच॥ ॥मलयध्वजपांड्येशाः स्वकन्यां पुर
स्यच॥ मधुरां मंडपामास गंधोदकसुशोभितां॥१॥पताकाध्वजसंयुक्तां पूर्णकुंभसमुज्वलां॥ रंगवल्ली
वितानाढ्यां कदलीस्तंभशोभितां॥२॥समुत्कीर्णैरसैरथ्यां प्रतोलीतोरणैर्वृतां॥भक्ष्यभोज्यान्नगि
रिभिस्तांबूलनगशोभितां॥३॥धूपामोदैर्वकुलांदीपमालाविराजितां॥ लाजमोदकहस्तैर्नरै
कन्यासमावृतां॥मृदंगमुरजोहड्डावीणादुंदुभिनादितां॥ हालास्येशामहाधाम शोभमानां च तां पु
रीं॥ देवसंघैः परिवृतो विष्णुना ब्रह्मणा सह॥ ५॥ दिशापालैर्मुनींद्रैश्च यक्षगंधर्वकिन्नरैः॥न
त्याप्सिरसरोवृंदैः गायद्गंधर्वकिंन्नरैः॥ ६॥ शंखकालहलभेरीणामारावैर्मुनिसंस्तवैः॥ जयेति वंदस्तु
तिभिः गणेंद्रैश्च प्रतिष्ठितो॥ ७॥आतपत्रकरेणेव भंगिणा चंद्रिना तदा॥वीरभद्रेण च तदा पार्श्व वीजि श्रीशिव
तचामरैः॥ ८॥ प्रविश्यलांतदादेवो मधुरां मधुरापुरीं॥ नटानकां पुरस्कृत्यमलयध्वजपूजितो॥९॥
प्रक्षाल्यांघ्रियुगं शंभोः पार्वतीशंगहान्नृपः॥ सभायां मणिकारव्यां यांसिंहासनवरे हरं॥१०॥संस्थाप्य
पूजयामास मधुराभरणांबरैः॥गंधैः कुसुमहारैश्च हारैराभरणैर्वरैः॥ ११॥संपूज्य विष्णुब्रह्मादीन्सुरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुरगणान्नमरान्॥गंधैःपुष्पैःश्चनांबूलैर्वासोलंकारभूषणैः॥१२॥शुभेमुहूर्तेमीनाक्षींससर्वैर्भूष
णैर्वृतां॥श्रृंगारधारयाहस्तेदत्तवान्कृत्तिवाससे॥१३॥एकांतेकमलासेवीतंत्रपादापतटानकं॥मधु
पूरवल्लभेवकांतेनाधिमीनाक्षीदाने कुचयुगमविभिन्नचक्रवाकेकृपयापालितसर्वजीवलोके॥
ननद्रुमालयध्वजाक्षंतमयिपोलेकलकोकूतनादकद्वेकलितानेकजगन्निवासकुक्षे॥१५॥मदाला
शुभहल्लकांनपापेमयिशोणेनयनीयपयोधिनीमुरवीद्रुमंददासेमदसंभरचारीं द्रविलसन्नभिं
दानेपठनामनिशंप्रभानकालेमणिमालायकुभूतिदाशाघटिकाशालचातुरीविदध्यान्करुणात्करु
णापूर्णाकराक्षमंनिवेशान्॥१६॥नदन्ध्रोतुहिनम्रापमहीधरोदरस्त्रोमदनारिपीरत्नेहघताथोपा
पिंस्तये॥विधिवाहविचित्रकेलिधानेयमनामोदनपूजितपादने॥मधुरेक्षणभावपूतमीनेमयि
दीनेमधुवैरिविरिंचिमुख्यसेव्येमनसाभाविनचंद्रमौलिभाव्ये॥मनसापिनिहितयदारुण्येमदंभव्ये॥
जगदंबकदंबमूलवासेकमलामोदेमेंनूपुरःसरं॥सुंदरायवरायायहरायशशिमौलिने॥मलयध्वज
पांड्येशोभार्ययासहहृष्टधीः॥तदादुंदुभयोनेदुःननृतुश्चाप्सरोगणाः॥समुद्रायलिंगधर्वीदेवाश्च
कुःसुमाक्षतान्॥जयेरीतिचतत्रासनवाचोमुनिगणेरिताः॥ननर्तोनंदभविनोधघटजोद्वाहमंगलं॥
दृष्ट्वाश्रीसुंदरेशास्यमीनाक्ष्याश्चतदाद्भुतं॥शिवादेशाद्दक्षिणाशागमनेदुःखमप्यजन॥अस्तु
वन्परयाभक्त्यामीनाक्षीसुंदरेश्वरं॥ ॥ अगस्त्यउवाच॥ ॥शांतंशारदचंद्रबिंबवदनंकांतंकृपा
लंतदा॥दांतंदारितदानवंमृगकरत्वांतंप्रभादंतुरं॥कांताकुंतलकांतवाममलसत्वांतांतहीनंभ
जेऽश्रांतंशांतजनंभवंतमधुनावांतकृतांतांतकं॥२५॥कदंबविपिनाविनीविहारिणेजगत्कारिणेफ
णाधरणधारिणेत्रिशूलध्वजपांड्यराजकन्येमयिमीनाक्षिकृपांनिधेहिधन्ये॥वाचावामनसाथवा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गिरिसुतेनकायेनवासंततंमीनाक्षीतिकदाचिदंबकुस्थलेत्वन्नामसंकीर्तनं॥२६॥ लक्ष्मीस्तस्यगेहे
५१ वसत्यनुदिनंवाणीचवक्त्रांबुजेधर्माधर्मचतुष्टयंकरतलप्राप्तंभवेन्निश्चयः॥ कदंबवन्यांशिवराज
कन्यांपाड्येंद्रकन्यामवलोकिनोये॥ तेसर्वमान्याःक्षितिपुगेनधन्यावन्याश्चसामान्यनरास्तथान्ये॥
॥२७॥ तदागस्त्योमुनिःश्रेष्ठःपतंजलिसमन्वितः॥ ननामपांड्यभूपेनविष्णुब्रह्मादिभिःसुरैः॥
॥२८॥ स्नात्वासुवर्णपद्मिन्यांदृष्ट्वाश्रीसुंदरेश्वरं॥ संपूज्यांह्रिल्लिनवर्णाणःत्रिपुंड्रावलिभूषितः॥ द्रा
॥२९॥ शिवलिंगार्चनंचक्रुःबिल्वपत्रैर्महेश्वरं॥ शिवेनैवेधघ्नोषेणभोक्तुंसर्वसुरान्मुनीन्॥३०॥न्यमं
त्रयत्पांड्यभूपोविष्णुब्रह्मादिकान्गणान्॥ तदापतंजलिःप्राहभगवंतंचसुंदरं॥३१॥ ॥पतंजलिरुवाच॥
॥नियमात्तवपादपंकजंसततंहेमसभाविभातंसुरसिद्धमहर्षिसेवितंमुनिसिद्धमहर्षिसेवितं॥भोज्येयवि
लोकयन्त्यग्रानत्रहेमसभानटंपतंजलिवचःश्रुत्वादेवःसुंदरनायकः॥३२॥ कलधौतसभामध्येननर्त्ती
ग्रपतंजलेः॥वादयन्डमरुंहस्तेवल्हिसंधारयन्हरः॥३३॥ व्यत्यस्तपादांबुजधगपस्मारोल्लसत्सदा॥
ब्रह्ममुंडलसद्धारोजटावंदेंदुशेखरः॥३४॥ मंदस्मिताढ्यवदनोमुनीद्रस्तत्रसुरासुरान्॥विलोकयक
रुणादृष्ट्याकालधौतसभापतिः॥३५॥फुल्लहल्लकधारिण्यादेव्यापार्श्वस्थयामुदा॥ ववर्षुःकुसुमान्ये
वर्जयेशेतिचवादिनः॥३६॥सुराश्चमुनयःसर्वेविष्णुब्रह्मादयोगणाः॥अस्तुवन्मुनयःसर्वेसपतंज
लिकुंभभूः॥३७॥ देवतूर्याण्यवाद्यंततत्रनृत्यतिशंकरः॥ ॥मुनयऊचुः॥ ॥कलधौतसभेविभाति श्रीशिव
शंभोनवन्दत्यंसुरवंदंजगन्नद्यु॥परिलोकयतांनजन्मदुःखमरणादालभनभवाद्य॥३८॥ हरहरशं
करदेवदयाकरशशिधरशेखरतुंगजटाधरपाहिविभो॥ गांगतरंगविलासकपर्दकब्रह्मकरंकधरो
रुकरुसवरक्षितकुक्षिगतारिवललोकविलोकनपाहिविभो॥३९॥ हरविराजितकालोदरवरसदन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरवर पाहि विभो ॥ देव दयासदृशाद्य दशा पाहि महेश महासविलास ॥ ४० ॥ ॥ श्रीस्कंद उवाच ॥ ॥
इत्थं पतंजलिज घटोद्भव विष्णु ब्रह्मेंद्र पांड्य मुनींद्र वरैः स्तुतांघ्रिः ॥ राराजिते रजतगोष्ठ निविष्ट पाद
पद्म प्रभा विजित सर्व जनाद्य मोहः ॥ ४१ ॥ देवस्तत्र मुनीश्वरैः सुरगणैः ब्रह्मेंद्र नारायणैः ॥ भोक्तुं तत्र
स पांड्य पेन मुदितं संपूजितं शंकरः ॥ आधायं किंग तस्य कुंड क गणस्याहाड बंकुक्षिगं तेन पादि
तमन्नमत्र बुभुजे कुंडोदरो वामनः ॥ ४२ ॥ हाहा क्षुद्भवनेन तन्निरधुना संजायते शंकरा ॥ तस्मै
पातु मथा जुहाव सरितं देवोपि तां वैगिनीं ॥ ४३ ॥ पीत्वा रत्नोत्तमचारमप्य घट्टरं चुक्रोश कुंडोदरः ॥ शां
भो शशांक शिरसा परिशोभमान पांड्य त्रासहृन्नि युक्षिरेत्वममामवेश्चा ॥ ४४ ॥ देवा मुनीश्वर गणा अ
पि चंद्रमौलिं वीक्ष्य विस्मितधियो मलयध्वजेन ॥ तज्ज्वरारेव परिगतय उवाच लं तं संजहि वान्ह
शाबुभुजस्तदानंतरंगे ॥ ४५ ॥ एवं चिंत्य विविधास्य चकार लीलाः पांड्येश्वरोपि शिवसत्करराज्यभा
रः ॥ लेभे पदं जननहीन मथो शिवस्य कैलासमत्य गणपुंगव नामवाप ॥ ४६ ॥ मीनाक्ष्या सुमुदेत दास
भगवान त्र्यक्षेपि कायाः पतिः ॥ देवा स्वयं वरपांड्य पत्यजनयस सस्तद्दशापारं पुरी ॥ ४७ ॥ द्वात्रिंशद्द
रपांड्य याचितमहालिंगं सदा सुंदरं वंदे तां शाफलराक्षिणींमपि शिवाराजन्य धौरंधरीं ॥ हालास्य
लास्य सदनं न्यथ शिवरूपया पूर्णया पांड्यसीमन्यायलानंत लीलाः परशिव शिवानायको नंतशा
क्तिः ॥ ४८ ॥ नाम्नास हरं त्रेसभापतिसुराः कुंडोदरायात्ममदात् ॥ संवेधं स्नातुं च स्वश्रवासहितं
च पांड्यं स्वर्गस्थ मानीभुवस्थलेधे स्वपुत्रनाम प्रदधौ तथैवोग्रं सुगन्नस्तदेशोप्यदशानथायुधं ॥ ४९ ॥
स निपठितं संताडनमचाकरोदिक्षोतमागान्मुकुटं जहार ॥ सरात्रे सहं द्वादिगतं हिरण्यं वर्षां प्रददौ
महेशः ॥ ५० ॥ श्रीदक्षिणामूर्तिरपापविद्याधितत्त्वपादांन्निगमांतसारं ॥ मुनिभ्यः कथयन्महामणी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैश्यो पापभक्तवान्॥ ५१॥ क्रयपकृत्व्यो भवन्मेघैः सुदासदामहां बुधिनां पयः प्रपानं स चकार शंकरः॥ अ
५२ वर्षदेशोप्यतिभ्रमणवारणं चकार मेघौघगणस्य ताडनं॥ ५२॥ आशामित्थमथ प्रादर्शमत थैण्यमोभ्रा
म्पुंडाग्रनः॥ ५२॥ स्वभ्यो कांडामणाश्रहीनपकरानगनप्रनां इगजं॥ हत्वा रुक हिताय विप्रवनितां क
न्यां प्रसादं व्यधात्॥ ५३॥ व्यभस्तांसकृत्तमदुनकरं संदर्शयद्दे मुनीन्॥ विप्रस्यात्र च भूम्यतिकरं संस्रू
श्वयच्छंकरः॥ ५४॥ मात्रान्यांपित्तमारकं पालयच्छत्वा भटार्थत्वचं प्रादात्सर्वमहाविषयपरकूलं संपा
रयात्त्रहि॥ नगनास्तांसपणः करोत्यभ्युपतिः सैन्यं न ये दर्शापत॥ पांड्याय प्रददौ हिरण्मयम थोंमालां
चवैश्यपाकृतिः॥ ५५॥ भूत्वा वध्य जकन्यकासुवलयन्नत्यं विधत्ते शिवः॥ व्यक्षेयदसुशिक्षणं च चक्रमेचो
लंरिपुं पांड्यं येह यातमपकरोत्स च ददौ सैन्ये तु पानीयकं लोकानां रसवादनोहितमनुश्च वक्रे द्विजार्तिहर
नं॥ काष्ठानां वरभावहत्यभ्युपतिः चोरायपप्रामदात्॥ भद्राय प्रददौ सुखास्यफलकां जये नविग्रहितां जा
पांतदीयां व्यधात्॥ आमात्रकान्कोलसुतानरक्षत्स खंजरीटैर्जयपत्रकाकान्॥ श्रीमत्सुंजयमंत्रकूजन
रतं चक्रे यतं पक्षिणं भारद्वाजमुखेनकाकनियहं मर्थीव संलंधयन्॥ शोविंबाना पुरेश्वराय सदं दौ दीक्ष्या
स्वभक्त्याथ वै॥ राज्ञः कोशधनव्ययेन स करोच्छंभोः सर्वं कर्धकं॥ राज्ञः कोशाधनशाधनं नद्धरवैरेः संपीड
नात्तद्वी॥ सर्वेर्ईशोभेरुभणांप्यब्रावदधोरोद्राश्वरं दं नदानधा कर्षणमाननोदधतदासत्कूलसंपूर
णे॥ भक्ताय्रनमाप्रदत्तमपिवत्स्यपिंइयं पयोत्स्तोलिनां॥ मद्वारं त्यच हत शिवोपिसमतदागंगेंदुमुत्तेमुदास्ते
शील्पिं दुत्तमाहरेति च त्तपणो नाडिनश॥ नां रुषां सर्वेषामपि शंभु गामथ करोधालास्यनाथेश्वरः॥
पांड्यं गजेपीडनं व्यनशाय सव्यरचत्तदक्षिणिलाशाश्वा घव्यपकर्तुमीश्वर महानिदोषपरोनगनकः॥ भस्माश्चा
दिवि रुक्षकः श्रुतिगतश्रीरुद्रपंचाक्षरो तां शूलेषुयरोषयन्न पतिनासंमुख्यभक्तेनवै॥ वेश्यासाक्षिणमात

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नोदयहरः कूपंग्रामीनत्रवै॥ ॥स्कंद उवाच॥ एवं चतुःषष्टिमहेशलीला हालास्यनाथः शफराक्षिणी
पतिः॥ चकारविस्तार्य एकुंभसंभवात्। स्कंदे पुराणे स्वकसंहितायां॥ संश्रुत्य वनो पुण्यमनुक्षणं भवेत्तहा
लास्यनाथस्य कृपाकटाक्षतः॥ हास्यंभवेदन्यकथासु सज्जनो॥६७॥ ॥इति श्रीशिवरहस्ये उग्राख्ये
सप्तमांशे उत्तरभागे पंचचत्वारिंशोध्यायः॥४५॥ ॥उग्रायनमः॥ श्रीस्कंद उवाच॥ ॥पुराकैलासशि
खरे सुखासीनं महेश्वरं॥ प्रणम्य विष्णुः प्रोवाच कृतांजलिपुटस्तदा॥१॥ ॥विष्णुरुवाच॥ ॥सर्वोसरसि
द्धियोगस्य मंत्रमेकं ममादिश॥ इति संप्रार्थितस्तेन माधवेनाह चांबिका॥२॥ संचिंत्यानुस्तुवन्स्तोत्रं स
र्वेषां सर्वसिद्धिदं॥ नदेशनामसाहस्रमुक्त्वानिमिविष्णवे॥ ३॥ तेन जित्वासुरान्सर्वान् ररक्षसक
लं जगत्॥ सर्वार्थसिद्धियोगं च प्राप्तवानंबुजेक्षणः॥४॥ नदेयप्रार्थयत्यद्य पठनान्नर्ननादसो॥ न
त्यं रद्वीयपतिप्रभुनामसाहस्रमंबिके॥ सर्वपापहरं पुण्यं सर्वरक्षाकरं नृणां॥ सर्वैश्वर्यप्रदं सर्वसिद्धिदं मु
क्तिदं परं॥६॥ वक्ष्यामि शृणु ते देवि नामसाहस्रमुत्तमं॥ ॥शिव उवाच॥ ॥श्रीशिवः श्रीशिवोनाथः
श्रीमान् श्रीपतिपूजितः। शिवंकरः शिव[illegible] शिवतरः शिष्टहृष्टः शिवागमः॥१॥ अखंडानंदचि
द्रूपः परमानंदतांडवः॥ अपस्मृतन्यस्तपादः कृत्तिवासाः कृपाकरः॥ २॥ कलिवादंष्ट्रिपः कालः काला
तीतः कलाधरः॥ कालनेता कालहंता कालशत्रुमद्दलकः॥३॥ कालजः कामजः कांतः कामारी कामप
पालकः॥ कल्याणमूर्तिः कल्याणीरमणः कमलेक्षणः॥४॥ कालकंठः कलाकारः कालकूटविषाशनः॥
कृतज्ञः कृतसारज्ञः क्रतुजः कृष्णपिंगलः॥५॥ करिचर्मांबरधरः कपाली कलभापहः॥ कपालमालाभ
रणः कंकालः कालनाशनः॥६॥ कैलासवासी कामीशः कालीकपटवर्जितः॥ कमनीयः कलानाथशि
खरः कंबुकंधरः॥७॥ कपर्दकोटिसदृशः कपर्दीकमलासनः॥ कराजधनदासानिः कदंबकुसुमारुणः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ ॥८॥ कमनीयनिजानंदमुद्रांचितकरांबुजः॥ स्फुरड्डमरुनिध्वाननिर्जितांभोधिनिस्वनः॥९॥ प्रचंडतां
डवश्चंडः उर्ध्वतांडवपंडितः॥ सव्यतांडवसंपन्नमंद्रतांडवभैरवः॥१०॥ ब्रह्मतांडवविस्फोटमहाप्रलयपतां
 डवः॥ नंदिनंदाप्रियो नंदी नटेशो नटवेषधृक्॥११॥ कालिकानाट्यरसिकः निशानटननिश्चलः॥ भृं
गिनाट्यप्रमाणज्ञः भ्रमाराधितनाट्यकृत्॥१२॥ वियदादिजगत्स्रष्टा विविधानंददायकः॥ विकारर
हितो विष्णुः विराडीशो विराण्मयः॥१३॥ विराडादयपन्नस्थः विधिर्विश्वाधिको विभुः॥ वीरभद्रो विशा
लाक्षो विष्णुबाणो विशांपतिः॥१४॥ विद्यानिधिर्विरूपाक्षः विश्वयोनिर्वृषध्वजः॥ विरूपो विश्वदिग्व्यापी
वीतशोको विरोचनः॥१५॥ व्याकृतो व्याकृतो व्यापी व्याप्यसाध्यविशारदः॥ व्यामोहनाशको व्यासः सव्यमु
द्रालसत्करः॥१६॥ वरदो वामनो वंद्यः वरिष्ठोऽर्कजवामभृत्॥ वेदवेद्यो वेदरूपो वेदवेदांतवित्तमः॥
वेदात्मविद्वेदयोनिः वेदांगो वेदविस्तुतः॥ वैकुंठवल्लभो वेद्यः वैश्वानरविलोचनः॥१८॥ समस्तभुवनव्यापी
समुद्रः सततोदितः॥ सूक्ष्मात्सूक्ष्मतरः सूर्यः सूक्ष्मस्थूलत्ववर्जितः॥१९॥ सुररूपः सुराध्यक्षः सभुः सुरव
धनः सुधा॥ भद्रो भद्रप्रियो भद्रवाहनो भक्तवत्सलः॥२०॥ भगनेत्रहरो भर्गः भवघ्नो भक्तिमान्निधिः॥ अ
रुणः शरणः शर्वः शरण्यः शर्मदः शिवः॥२१॥ पवित्रः परमोदारः परमापन्निवारकः॥ सनातनः समः सत्य
सत्यवादी समृद्धिदः॥२२॥ धन्वी धनाधिको धन्यः धर्मनेत्रा धराधिपः॥ तरुणस्तारकस्ताम्रः तरिष्णुस्त
त्वबोधकः॥ राजराजेश्वरो राजा रात्रिंचरविनाशनः॥ गह्वरेष्ठो गणाधीशः गणेशो गतिवर्जितः॥२४॥
पतंजलिप्रभानाथः परापरविवर्जितः॥ परपारः परंज्योतिः परमेष्ठी परात्परः॥२५॥ नारसिंहो नगाध्यक्षः श्रीशिव
नादांतो नादवर्जितः॥ नमदानंददो नम्यः नगराजनिकेतनः॥२६॥ देवो भिषक्पतिर्ब्रह्मा ब्रह्मण्यो ब्राह्म
णात्मकः॥ कृतांतकृत् कृशः कल्पः शांतिदः शरभाकृतिः॥२७॥ ब्रह्मविद्याप्रदो ब्रह्मा बृहद्गर्भो बृहस्पतिः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सद्योजातः सदाराध्यः सामगः सामसंस्तुतः ॥ २९ ॥ अघोरो द्भुतचारित्रः अनंतवपुराग्रणी ॥ ईशानः सर्व
भूतानामीश्वराणामधीश्वरः ॥ सर्वार्थः सर्वदातुष्टः सर्वशास्त्रार्थसंमतः ॥ सर्वेशः शार्वगःस्त्रगुणः सर्वेशाः
समरप्रियः ॥ ३० ॥ जनार्दनो जगत्स्वामी जन्मकर्मनिवारकः ॥ मोहकोमोहविच्छेत्ता मोहनीयो महप्र
भुः ॥ ३१ ॥ वियत्केशो भिविशादः विश्वक्सेनो विशोधकः ॥ सहस्राक्षः सहस्राङ्घ्रिः सहस्रवदनांबुजः ॥
॥ ३२ ॥ सहस्राक्षार्चितः संम्राट् संधाता सुरघानकृत् ॥ सहस्रभूषणनिधिः बलप्रमथनो बली ॥ ३३ ॥
मनोभर्ता मनोगंधः मननैकपरायणः ॥ उदासीनो उपद्रष्टा मौनगम्यो मुनीश्वरः ॥ अमनी मदनो म
न्युः ममानी मानदो मनुः ॥ यशस्वी यजमानाख्यः यज्ञो वेधो मुनिप्रियः ॥ ३५ ॥ मीढुष्टमो मृगधरः मृ
कंडुतनयप्रियः ॥ पुरुहूतपुरद्वेषी पुरत्रयविदारविन् ॥ ३६ ॥ पुण्यः पुमान्पुरिशयः पुण्यपूर्णः पुरात
नः ॥ शयानः शंतमः शांतः शासकः शामनप्रियः ॥ ३७ ॥ भावद्वेषी धविच्छेत्ता भावातीतो भयंकरः ॥ मनुजो
मनुजाधीशो मिथ्याप्रत्ययनाशनः ॥ ३८ ॥ निरंजनो निनिर्विभद्रो नित्यबुद्धो निराश्रयः ॥ निर्विकल्पो नि
रालंबो निर्विकारो निरामयः ॥ ३९ ॥ निरंकुशो निराधारो निरपायो निरत्ययः ॥ शुभाशयो गुणातीतो गु
णमूर्तिगुरुप्रियः ॥ ४० ॥ प्रमाणं प्रणवः प्राणः प्राणदः प्राणनायकः ॥ कपालमालालंकारः भ्रभसत्त
पसांनिधिः ॥ अक्षरः त्र्यक्षरः त्र्यक्षः पक्षपातविवर्जितः ॥ माणिभद्रार्चितो माद्योमाधवी मंत्रको महान्
॥ ४२ ॥ कुठारहस्तकुलाद्रीशः कंचित्रैकपदांबुजः ॥ मंत्रराजस्यफलदः यशोमूर्तिर्यशस्करः ॥ ४३ ॥ वि
प्रेशः सिद्धिजनकः सिक्षाहः सिधवैभवः ॥ रविमंडलमध्यस्थः द्विजो गुणविनाशनः ॥ ४४ ॥ रविमंडल
मध्यस्थो वर्षीयान्वरुणेश्वरः ॥ सोममंडलमध्यस्थः सोमधन्यशुचोदरः ॥ ४५ ॥ दक्षिणाग्निर्गार्हपत्योद
मनोदानवांतकः ॥ चारुवक्त्रस्त्रिनेत्रधरः पंचवक्त्रः परंतपः ॥ ४६ ॥ विश्वस्यावलतो वर्याः वेदारजनवत्स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 लः॥गायत्रीवल्लभोभाग्योगायकानुग्रहोन्मुखः॥४७॥अनुरूपःसुधामात्मागायत्रीव्याहृतिःस्वपात्॥दुरा
 राध्योदराधर्षःदुराशोहोदुरासदः॥४८॥ दुर्विज्ञेयोदुराचारनाशनोदुर्जनांतकः॥सर्वेश्वरःसर्वसाक्षी स
र्वान्मासाक्षिवर्जितः॥४९॥सर्वहृद्धृदयकरः सर्वपापनिवारणः॥सर्वप्रियतमःसर्वदारिद्र्यक्लेशनाशनः॥
॥५०॥ द्रष्टादर्शयितादांतोदक्षिणामूर्तिरूपधृक्॥ दक्षाध्वरहरोदक्षोदहरस्थोदयानिधिः॥५१॥समदृष्टिः
सत्यकामःसनकादिमुनिप्रियः॥कोशपंचकनिर्मूलःपंचकृत्यपरायणः॥५२॥ पंचयज्ञप्रियःपंचप्राणधीः
पतिरव्ययः।पंचभूतःप्रभुःपंचपूजःसंतुष्टमानसः॥५३॥ विघ्नेश्वरोविघ्नहरोशक्तिपाणिःशरोद्भवः॥गूढोगुह्य
नमोगोप्योगोरक्षोगणसेवितः॥५४॥ सत्यदःसत्यसंकल्पःसुखवेत्तासुखावहः॥योगगम्योयोगनिष्ठोयोगमं
त्रोयुधिष्ठिरः॥ तत्त्वावबोधस्तत्त्वेशः यज्ञभूर्वीरणात्मकः॥चैतन्यभ्रूश्चिद्धिदीशश्चिन्मात्रश्चित्सभाधिपः॥५६॥
भूतपतिर्भव्यभूर्भूःहव्यकव्याहुतिप्रियः॥वाच्यवाचकनिर्मुक्तःवागीशोवागगोचरः॥५७॥ वेदांतकृत्सुदी
र्घायुर्विधुरःसुकृतुर्वरः॥अंबुभक्षःपयोभक्षोत्रिगुणाकाशलोपगः॥आप्तकामोनुमंतात्माकामोभक्तेषु
सुंदरः॥अस्तेयःसागनिर्मुक्तःस्नेहदीर्घविशोषकः॥५९॥ स्वच्छंदःछंदनिर्मुक्तःस्पृष्टव्योमभ्रनोम
तः॥अपरोक्षप्रियोलिंगमध्यव्याप्रेमसंगरः॥६०॥ दानलिंगोगतिर्ज्ञातीनादगम्योपभास्करः॥शुद्ध
स्फटिकसंकाशःस्तुतिप्रस्तुतवैभवः॥६१॥ हिरण्यबाहुस्तोमाख्योहरिकेशोदिशांपतिः॥सस्पिंजरः
पशुपतिःविषमानधनांपतिः॥ बंधुशोभगवान्भव्योविन्यासोधिपतिःपरः॥आशाजापतिरशुद्धोहरि
केशोहृयाकृतिः॥६३॥पुष्टानांपतिरव्यग्रोभगहेतिर्जगत्पतिः॥स्वाहारूपोवसुमनाः बटुकक्षेत्रपाल
कः॥६४॥शापार्तिहाशत्रुहरःशूलीस्मृतिविधायकः॥अप्रमेयोप्रतिरथःप्रयुक्तःपरमेश्वरः॥६५॥
अनुत्तमउदासीनोमुक्तिशोमुदितानतः॥षडध्वपाटधेशःवेतानानलसंपटः॥६६॥ मद्रामयोमृग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोमः महावीर्यो महाभुजः ॥ महानंदो महास्कंदो महानंदो महानिधिः ॥ ६७ ॥ भ्राजिष्णुर्भोजनं गम्योभू
विज्ञानविनाशनः ॥ महार्थवाग्मी मेधावी महासेन गुरुर्महः ॥ सर्वोटकः सर्वभत्यः सर्वदर्पः ग्रामप्रियः ॥
दीर्घसिक्तजटाजूटः वीरबाहुर्दिगंबरः ॥ ६९ ॥ सत्यकामः सत्यधामः संतापदिनसहस्रदकृ ॥ हेतुर्द
योनिनिर्मुक्तो हेतुर्मे ज्जन्मभञ्जन ॥ ७० ॥ हेलाविनिर्जितजगत हेमश्मश्रून्यविद्याशयः ॥ सकृद्विभातः संव
त्सरदसत्कोटिवर्जितः ॥ ७१ ॥ स्वच्छाब्रसबुधः स्वामी स्वानन्यः श्वसितारिवलः ॥ रतिदारुचपुण्याघः
पद्मावंधुहरः स्वभूः ॥ ७२ ॥ वशी वरेण्यो विततो भूरि राजा वशोभितः ॥ रोहितश्च पतिर्वृक्षः पतिर्मैत्री
चवाणिजः ॥ ७३ ॥ असयेश्वेतपीतश्चाभवः सोमपिबः कृती ॥ आर्ये ईशः शातामीशः उच्चैर्घोषोविभी
षणः ॥ ७४ ॥ पतिनामधिपः कृत्स्नजं वा नो धसत्ववान् ॥ महमानश्वनिव्याधिः आव्याधिर्नियमो यमः ॥
॥ ७५ ॥ अव्ययी दितिरादित्यः ककुभः कालकोविदः ॥ निषंगीषुधिमानिंद्रः तस्कराणामधीश्वरः ॥ ७६ ॥
निचेर्युक्तः परिचरः अरण्यपतिरायतः ॥ सकावीमुष्णातां नाथः पंचाशद्वर्णरूपभृत् ॥ ७७ ॥ नक्तंचरः प्रकृं
तानां पतिर्गिरिशः स्वरोगुरुः ॥ कुलुंचानां पतिः कुप्यः धन्वाविभ्यो नदाधिपः ॥ ७८ ॥ आतन्वानः त्राता नंदः
श्रुत्योग्रस्यपतिः सुराः ॥ त्वारोत्वान पतिर्विप्रः अवर्ष्यः सुल्लकः क्षमी ॥ ७९ ॥ बिल्वावेनसधीः दुंदुभ्यः आ
हनन्यः प्रतंद्रितः ॥ ध्व ष्ववर्हेलसेभक्ष्यादंसु प्रसिक्षः महजः सुखी ॥ ८० ॥ स्तुत्यः पक्षः स्वनंतश्च का कनी
यः करोटिभृत ॥ सूद्यः सरस्यो वैशंतो नाद्यो वर्ष्यो अवर्षकः ॥ ८१ ॥ विद्युत्यो विवावो मेधाः रोध्रियो वा
स्तुवो वसुः ॥ अग्रेवधो ग्रे संपूज्यं हं ता ना रोम योभुवः ॥ ८२ ॥ मपस्करो नहानी र्थः सात्यापार्योपदात्मकः ॥
शंखभूतरणेवार्यः फेन्यः ज्ञाष्योशिवाधजः ॥ ८३ ॥ मुनिरातार्थ आलाद्यः सिकत्यश्च त्रिगुंत्रिलः ॥
पुलस्यस्क्षयणे स्त्रण्यं गोष्ठ्यः गोपरिपारुकः ॥ ८४ ॥ सिध्योहरित्यो वेण्यश्च स्तुत्यवस्त्यो निमादिभुः ॥ वर्ण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शाद्यः प्रत्यगात्मा प्रसन्नः परमात्मनः॥ ८५॥ शयनीयः शातानंदः शशीदीपः सुरासुरः॥ पाशीपातकसंहर्तानी
ल्पोमनस्तिमिरार्णवः॥ ८६॥ वराभयप्रदो ब्रह्मपुच्छो ब्रह्मविदांवरः॥ ब्रह्मविद्यागुरुर्वैद्यः गत्यकामी च नस
भी॥ ८७॥ कृतांतकः क्रियाधारः कृतिः कृपणरक्षकः॥ नैष्कम्यदो नरसः त्र्यक्षस्त्रिपुरवैभवः॥ ८८॥ त्रि
मातृकस्त्रिवर्णत्स्कल्पस्त्रेलाग्निस्त्रिगुणात्मकः॥ त्रिधामा त्रिजगद्धेतुः त्रिनेत्रः त्रिजगद्गुरुः॥ ८९॥ प्रपंच
वत्सगोनामरूपद्वंद्वविवर्जितः॥ प्रकृतीशः प्रतिष्ठाता प्रभवः प्रमदः प्रधिः॥ ९०॥ गुणिनिश्रितार्थो आद्यंतः
तत्त्वमस्यर्थवाचकः॥ हितः प्रसादः परवान् सर्वोपनिषदाशयः॥ ९१॥ विश्वंस्वलोगियहेतुः विषमोविद्युतप्र
भः॥ अखंडबोधोरखंडात्मा सूर्यमंडलमंडितः॥ ९२॥ अनेकशक्तिराचार्योः पुष्करः सर्वपूरणः॥ पुरुजि
त्पूर्वजः पुष्पहासः पुण्यफलप्रदः॥ ९३॥ नगाम्बोध्यक्रूपादिः पुयोधर्मचतांवरः॥ अवशः स्ववशः स्था
णुः अंतर्यामीसुतक्रतुः॥ ९४॥ कटच्छः कर्मपीठोच्छः कूष्मांडग्रहगोचरः॥ कुलभूषः कृपासिंधुः कुशलः
कुंकुमेश्वरः॥ ९५॥ गदाधरोगदाखामीगरिष्ठः समरायुधः॥ जवनाजगाधारः जमदग्निभुवोगुरुः॥
॥ ९६॥ जटाधरोहतानंगोअमतांकुमलोहवः॥ विश्वकर्माविभूतिस्थोविश्वमूर्तिर्दयापरः॥ ९७॥ विषत्का
रोविषत्कारः करोवटकरः पटुः॥ ब्रह्मिष्ठवर्त्मा नानार्थरूपेरोब्रह्मचेतनः॥ ९८॥ गायनोगरुडारूढोगजा
सुरविशानतः॥ गर्वीतैगगनावासोग्रंथीशायविभेदनः॥ भूतमुक्तावलीतंतुः भूतपूर्वभुजंगभत्॥ अंतका
रिः सारसक्तोमातचासः सदाशिवः॥ १००॥ शक्तिपातकरः शांतोशाश्वतः श्रेयसांनिधिः॥ अजीर्णसुकुमा
रांगः पारदृश्वापुरंदरः॥ १॥ अनादिसादिविज्ञानीनिर्विभावोविभावसुः॥ विज्ञानमात्रोविरजाः विरामोवि
बुधाश्रयः॥ २॥ विदार्योमुक्तवेषाद्यः विश्वातीतोविशोधकः॥ मायानंदविनोदांलोमायानटकशिक्षकः॥ ३॥
मायानाटकआनायीमायामंत्रविमोचनः॥ वृद्धिक्षयविनिर्मुक्तः विद्योतोविश्ववंचकः॥ ४॥ कालात्माका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिकानाथः कर्कोटकविभूषणः॥ षाडूर्मिरहितस्तथ्यः षड्विधैश्वर्यदायकः॥५॥ षडाधारगतः संख्यः प
डाश्रयसमाश्रयः॥ अनिर्देश्यो निलोगाख्यः विकल्पायोद्यवैभवः॥६॥ हेयार्हद्यविनिर्मुक्तः हेलाकल्पित
तांडवः॥ अपर्यासोपरिच्छेद्यो गोचरो रुग्विमोचकः॥७॥ निरीक्षो निगमानाथः निरानंदो निदानभूः॥
॥आदिभूतो महाभूतो स्वेच्छाकल्पितविग्रहः॥८॥ विस्पष्टः प्रत्ययानंदः निर्निमेषो निरंतरः॥ प्रबु
द्धः परमोदारो परमानंदसागरः॥९॥ संविस्तारकलापूर्णः सुरासुरनमस्कृतः॥ निर्वाणो दर्निर्दिदस्यः
निर्वा[illegible]रो निरुपाधिकः॥१०॥ आभासुरपरस्तंतुः ज्ञादिवः पेशरूपधिः॥ संज्ञातः सर्वसांकल्पः ससदी
ग्रः सदोदितः॥११॥ भावाभावविनिर्मुक्तः भाविनोभास्वरोहरः॥ सर्वाशीनीत्पारतटं सांवः सारस्वनम
दः॥१२॥ सर्वरूतसर्वमात्मसर्वेमपतत्वावलंबकः॥ केकिकेकाकेलिकरः कोकः बालविनायकः॥१३॥
दक्षानिष्यविरहितविहारी वीर्यवंधिनः॥ विश्रांतिभूमिवसनः विद्याहर्तविबोधकः॥१४॥ वीरप्रियो
वीरप्रियोधीतभयो विध्वद्दर्पविनाशनः॥ भेतालनटनप्रीतः वेतंडत्वकूहरंभरः॥१५॥ वेलातिलंघिकर
णः विलासीविनमोभरः॥ वैरस्यसेवाधिविध्वभोक्तारनबोधसंस्थितः॥१६॥ महागर्तो महाभोक्ता महा
संविस्मयोमधुः॥ मनोवचोभिसत्राघः महाविलकृतालयः॥१७॥ अनहंकृतिरच्छेद्यः स्वानंदैकमया
कृतिः॥ संवर्तात्मविलः सर्वः सुवास्याः सर्वसंग्रहः॥१८॥ संपन्नसकपः संश्रीसदोरुध्यः सकलोर्जितः
॥संभवद्धः सनिरुप्यः सविनिष्यः समग्रदृक्॥१९॥ समयस्थः सद्रुमस्थः संप्रविष्टसमुद्गकः॥ संस्पृष्टः
संप्रमर्दिनः स्त्रम्रूढः सप्रकाशः॥२०॥ सप्रशीलः सदाहृपः ॥ सत्वसंस्थः सुषुप्तिस्थः सुतल्प
सुखरूपगः॥२१॥ सविपल्योल्पासमुक्तः सभानीरागचेतनः॥ आदित्यवर्णसुज्योतिः सम्यग्दर्शनतत्प
रः॥ महातात्पर्यनिलयः प्रत्यग्ब्रह्मैकनिश्चयः॥ प्रपंचोल्लासनिर्मुक्तः प्रत्यक्षः प्रतिभात्मकः॥ प्रवेकम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मदार्थांगः सुनर्तनपरायणः ॥२३॥ योगीयोगपथाभूतः यक्षगंधर्ववंदितः ॥ जटारुः नटलापांगः महान
 टनलंपटः ॥२४॥ पाटलांशुः पटुतरः पारिजातद्रुमूलगः ॥ पापाटवीबृहद्भानुः भानुमत्कोटिकोटिभाः ॥२५
कोटिकंदर्पसौभाग्यसुंदरो मधुरस्मितः ॥ लास्यभूतचकोराणां पूर्णेंदुः पुण्यगोचरः ॥२६॥ रुद्राक्षस्रु
लाकल्यमहाकामाक्षरद्युतिः ॥ अमुल्यमणिसंभारस्वत्कणत्कंकणसत्करः ॥२७॥ चिच्छक्तिलोचनानं
दकंदलः कुंदपांडरः ॥ अगाम्यमहिमांभोधिरनेकयज्ञांशनिधिः ॥२८॥ चिदानंदनटाधीशः समुज्वलव
पुर्धरः ॥ चिदेकरससंपूर्णः श्रीशिवः श्रीमहेश्वरः ॥२९॥ ॥ श्रीशिवउवाच ॥ ॥ एतत्तेकथितं देवीन
टराजस्यसुंदरं ॥ नाम्नां सहस्रमत्यंतं गोप्यं नैतत्प्रकाशये ॥१३०॥ सर्वसिद्धिकरं पुण्यं सर्वविद्याविशारदा
॥ आपत्कालमहाव्याधिज्वराकुष्टादिनाशनं ॥१३१॥ अत्युत्पातभयक्षोभक्षुद्रशांतिदकारणं ॥ कूष्मांडभू
तवेतालग्रहापस्मारनाशनं ॥ ॥ ईश्वरउवाच ॥ ॥ मयासहस्रनामेदं दत्तं तद्विष्णवे पुरा ॥ विष्णुनातत्र
हालास्येस्तुवतेर्चापतंजलेः ॥ ३३ ॥ अगस्त्यो पिनटेशानं रजताख्यसभापतिं ॥ ॥ श्रीस्कंदउवाच ॥ ॥
कदंबन्यां शिवराज्यधान्यां पांड्येशकन्यापतिमीश्यधन्यः ॥ विराजमानं कलधौतनेत्र्यां नटेश्वरं नाम
सहस्रस्तुवन ॥१३४॥ ॥ इतिश्रीशिवरहस्येउमाख्येसप्तमांशेउत्तरभागेनटेशसहस्रनामकथनं
षट्चत्वारिंशोध्यायः ॥ ४६ ॥ ॥ श्रीउमायनमः ॥ श्रीस्कंदउवाच ॥ हालास्यनगरे विष्णुरनघादिशि
वार्चकैः ॥ वेगवत्याः सदाभागे संस्थितो भक्तिकामनः ॥१॥ संपूज्य सुंदरेशानं शिवानुज्ञामवाप्य च ॥ संस्तु
वीतिमहेशानं भक्तियुक्तो विकासरवं ॥२॥ ॥ अनघउवाच ॥ ॥ नमस्ते हालास्यनटनपटुपादाब्जभगव
न सुमीनाक्षीनाथ त्रिदशपतिसंपूजितपद ॥ प्रसीदेशानाद्य प्रथितनिगमांते खु गदितं भवंतं ध्यायेन्वे हृद
यकमले चात्र निवस ॥३॥ इत्थं स विष्णवे प्रादाद्वेगवत्यास्तटे तटे ॥ स्थाने तदलकाख्यं वैसतीर्थः सुंदरे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेश्वरः॥४॥ हालास्यदक्षिणेस्थानंशालिवाटीश्वराभिदं॥ मुनिभिर्देवगंधर्वघटजेनचसेवितं॥५॥ वि
ष्णुनासेवितंनित्यंशयानेनसंपूजितः॥ यत्रोत्तरवहाशंभोः सान्निध्येताम्रपर्णिका॥६॥ देवीकांती
मतीतत्रचंद्रकांताननानना॥ शालीवाटीश्वरस्याग्रेताम्रपर्ण्याजलप्लुतः॥७॥ मार्गशीर्षेमाससमात्रं
शालिवाटीश्वरंनमन्॥ कृतकृत्योनरोभूत्वासर्वपापैः प्रमुच्यते॥८॥ ताम्रपर्णीनदीतत्रकलिकल्म
षनाशिनी॥ तस्यांस्नात्वाशालिवाटीनाथंकांतिमतींशिवां॥९॥ सोमसूर्यग्रहणयोः ताम्रसागरसं
गमे॥ स्नात्वासकृच्छ्रद्धयाकंफलंशिवविलोकिनां॥१०॥ ताम्रपर्ण्यासदृशंनद्यः संगतापापहारिकाः॥ चित्राच
घटनासिंधुर्वरणावेगिनीनया॥११॥ ताम्रपर्ण्यालयामुख्याः तत्रस्थानानिभूरिशः॥ तत्रश्रीशालिवाटी
शंस्तुवन्नभ्यर्चयद्धरिः॥१२॥ ॥श्रीविष्णुरुवाच॥ ॥ नमस्तेचंद्रीलांशुद्युतिविजितदेहायभगवन्नभि
तंप्राचावेद्यस्तुततनतमुनीत्यानहरसं॥ महेशंविश्वेशंभवभयहरंदेवतमणिंप्रपद्येत्वांगिरिवरसुताय
स्तकधिभुं॥१३॥ हेशालिवाटीश्वरदेवकोटीकोटीररत्नांबुजपादशंभोः॥ मग्नंसुदुःखांबुधिमध्यगंत्वमामु
त्धरस्यागहरप्रसीद॥१४॥ नौमित्वांशशिकांतसुंदरमुखींब्रह्मेंद्रवंद्यांशिवांभक्तानांपरिसेवितांतवपदं
मुक्तिप्रदानोद्यतं॥ शांतांकांतिमतींमहेशरमणींत्वामाश्रयामीश्वरीं॥१५॥ इत्थंश्रीशालिवाटीशंदेवीकां
तिमतींहरिः॥ नत्वातत्रेशमभ्यर्च्यपुंडरीकदलेक्षणः॥१६॥ शालिवाटीश्वरागारेनैऋत्येचोत्तरदिक्स्थि
तः॥ विष्णुःसस्वालयेलिंगमभ्यर्च्यस्तौतिवैहरिः॥१७॥ भक्त्याश्रीशालिवाटीशाद्दतभागेमहेश्वरं॥ ॥
॥हरिरुवाच॥ ॥ नमस्तेमहादेवशंभोत्रिनेत्रप्रसीदस्वमर्त्येनवक्षेत्रमध्ये॥ वसंतंचशांतंभवत्पादपद्मंस
दाकमयंतंभजेचांतकांतं॥१८॥ तदागत्यशालिवाटेअग्निरग्नीशमर्चयन्॥ भक्तियुक्तोंबिकानाथं
मन्मथांतकमीश्वरं॥१९॥ तुष्टावदेवमग्नीशंताम्रपर्ण्याः तटेस्थितं॥ ॥अग्निरुवाच॥ ॥ नमोनम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 स्त्रीभगवंस्त्रिनेत्रप्रसीदगंगाधरविश्वनाथ॥ शशांकशोभावहमस्तकाद्यअग्नीश्वरेशानविभोप्रसीद॥२०॥
 एवमग्नीश्वरंवन्हिस्तत्रराध्यावमलद्यः॥स्वाहास्वधायुतोवन्हिःशिवनेत्रत्त्वमापद्दि॥२१॥ तत्रईशाप्र
मादेनशालीवाटीशप्राकदिशी॥तत्रागस्त्येमुनीनत्वाशालिवाटीश्वरार्चनं॥२२॥कृत्वातुष्टावदेवेशं
देवींकांतिमतीमपि॥ ॥अगस्त्योवाच॥ ॥ नमस्तेशालिवाटीशानमस्तेकांतिमत्तर॥ नमस्तेव्योमकेशा
यसुकेशायनमोनमः॥२३॥नमस्तेगांगसन्मौरे नमोधम्मिल्लमल्लिके॥ नमःकनकवर्णायहिरण्यायेन
मोनमः॥ २४॥ नमःशिवायत्रिपुरांतकायनमोमहेश्येशिवकांतिमत्यै॥ नमोत्रिपूज्यायमहेश्वरायन
मोनमोनीलसुकुंतलायै॥२५॥ इत्थंकुंभभवेनेशः शालिवाटीश्वरस्तुतः॥ देवीकांतीमतीतेनशशिकांता
ननास्तुता॥२६॥ तस्मैकुंभोद्भवायेशोनृत्यंदर्शयतीश्वरः॥ तत्रनाम्नसभामध्येनंदिभृंगिसमन्वितः॥
॥२७॥ विष्णुब्रह्मेंद्रविबुधैःमुनिसंघैःसमन्वितः॥अगस्त्यंपश्यपश्येतितत्रनाम्नसभातले॥२८॥
ननर्तानंदभरितोदेव्यादेवोमहेश्वरः॥अगस्त्योमुनिभिःसार्धंविष्णुब्रह्मादिभिःसुरैः॥ अस्तुवद्भक्ति
भरितःकुंभभूस्तत्रशंकरं॥मुनिर्बधांजलिपुटैर्मुनिदेवगणैर्गणेः॥३०॥ ॥ देवगणउवाच॥ ॥
नमस्तेनमस्तेशहस्तानलोर्ध्वज्वलज्वालयादग्धभक्ताघसंघ॥प्रसीदेशविश्वाधिकेशानशंभोष्टमू
र्तिभवंत्वंविलोक्यात्मधन्याः॥ नमस्तेभवत्यादपद्मेश्रयामोभवामोविमुक्ताघसंघाभजामः॥विमुक्तिं
मुभुक्तिंभवानेवशंभोप्रदानायभक्तेमहान्जागतस्याः" चरंचाचरंलोकमेवाद्यशूलिन कपालिन्म
हासर्पमालिन्नमस्ते॥त्वयासृष्टमादैत्वयापालमीशात्वयांतेहिसेव्यं येतैवकल्पांतिमेशा॥३४॥नन
स्मोम्नतास्योभवद्भक्तिविशालासमस्ताःभवभयद्दुःस्मसक्ताः॥त्वयीदंसमस्तंविभातीशशाश्वतभवन्न
तसंदर्शताद्बंधमुक्ताः॥३५॥ ॥श्रीस्कंदउवाच॥ ॥ इत्थंतान्नसभासुदिव्यचरणंशंभोर्मुदावीक्ष्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ते ब्रह्माद्यास्त्रिदशा मुनीश्वरगणाः कुंभोद्भवो वै हरिः ॥ निर्मुक्ताखिललोकपाशविधुराः भूषन्त दा
नत्र वै ध्यायंतः स्वहृदंबुजे चिरतरं श्रीशालिवाटीश्वरं ॥ ३६ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये सप्त
मांशे उत्तरभागे शालिवाटीश्वरवैभवे सप्तचत्वारिंशोध्यायः ॥ ४७ ॥ ॥ श्रीउमायनमः ॥ ॥ श्री
स्कंद उवाच ॥ ॥ न दक्षिणे चकुद्दालं हरिस्थानं पुराभवत् ॥ अगस्त्येन शिवस्थानं कृतं तत्पावनं पुरा
॥ १ ॥ ॥ जैगीषव्य उवाच ॥ ॥ हरेस्थानं चकुद्दालं शिवस्थानमभूत्कथं ॥ तारकारे वदाद्य त्वं कथां मे
विस्मयावहां ॥ २ ॥ ॥ श्रीस्कंद उवाच ॥ ॥ जैगीषव्य शृणुष्वाद्य त्रिकुद्दालं हरेः स्थलं ॥ समागता
ताम्रपर्णी पापनाशा उदग्वहा ॥ ३ ॥ पश्चिमाभिः मुखं क्षेत्रं हरेस्तत्राभवत्पुरा ॥ अगस्त्योगस्त्यकूटा
त्तु महेंद्रशिखराश्रयः ॥ ४ ॥ मुनिभिः सतपस्तेपे तत्र ध्यायं महेश्वरं ॥ भस्मरुद्राक्षसंपन्नः सर्वदा रु
द्रतत्परः ॥ ५ ॥ पंचाक्षरपरो नित्यं पंचास्यं पूजयन्मुनिः ॥ स्तुवन्निशं महादेवं मगस्त्यो देवमीश्वरं ॥
६ ॥ ॥ अगस्त्य उवाच ॥ ॥ सुधांशुधरशेखरं पुरहरं च गंगाधरं विभूतिपरिधूसरं उरगभारहारं
शिवं ॥ गरादनमुपास्महे मदनकायसंदीपनं निरंजनमुपाटनं नयनपूतवन्ह्याननं ॥ ७ ॥ भस्मरुद्रा
क्षसंपन्नं दृष्ट्वागस्त्यं महामुनिं ॥ मुनिभिः स्वसमानैश्चायांतं विष्णुर्विलोकयन् ॥ ८ ॥ वदनं शिवना
मानि शिवभक्त्याभियाहरिः ॥ दृष्ट्वा अवांसमा लोकयविष्णुः पाखंडमाश्रितः ॥ ९ ॥ दुर्मुखादर्जीनाला
पपापहं वीक्षणं सतां ॥ दृष्ट्वागस्त्यस्तदा विष्णोर्द्वारं ते सार्गलं व्यधुः ॥ तान्दृष्ट्वा द्वारतोगस्त्यः क्वचिल्लीनो
भवत्तदा ॥ मुनिभिः सतते वैषं पाखंडेन समाश्रितं ॥ १० ॥ सच्छिद्रोर्ध्वे श्वेतपीठं मध्ये कुंकुमरेखकं ॥
पदं स द्राविडं विष्णुः वैष्णवो श्वनगान्मुहुः ॥ ११ ॥ नारायणादि नामानि संवदन्भक्तितत्परः ॥ वैष्णा
वानां समाजं स समभ्यागान्महामुनिः ॥ १२ ॥ ते दृष्ट्वा वैष्णवश्रेष्ठं प्रणपेते हरिं तदा ॥ अन्योन्यमंज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिंचक्रुः मुनेरालंब्यते करं ॥१३॥ तदा प्रवेशयामास मुर्विष्णोरात्स्यमुत्तमं ॥ वैष्णवैः स तदा विष्णुं प्रधाव
 न्निव यैमुनिः ॥१४॥ वदन्नारायणानेतुगोविंदेति मुहुर्मुहुः ॥ नेदं नं पुण्यतीर्थादि राहीत्वामुध्यंज्ञो
धयत् ॥ अंतर्ययो तदा विष्णुभक्तवत्पाणि भस्मसात् ॥ यमर्दपाणिना तत्र जनार्दन शिरः स्पृशन् ॥१६॥
तदा विष्णुं स संपीड्य लिंगं चक्रे महेशितुः ॥ यथा पूर्वमगस्त्योभूद्रुद्रस्मरुद्राक्षपुंड्रधृक् ॥१७॥ द
ष्वा नेतं डुराधर्षलघुं हंतुं समुद्यताः ॥ हुंकारेणैव तान्सर्वान भस्मसात्करोन्मुनिः ॥१८॥ ज्ञाशाप
कुपितोऽत्यर्थं पाखंडान्वै व्याबाधमान् ॥ ॥अगस्त्य उवाच॥ भूयशिवद्रुहः सर्वे नरकं यांतु सान्वयः ॥
वेदबाह्यादुराचारा जारनारीगमाः खलाः ॥१९॥ भवंतो द्राविडा नेवयपिण्याकेंगुदसन्मुखाः ॥स
दा पर्युषितान्नादा भवंतु निरयंगताः ॥२०॥ यत्र कुत्रापि या विष्णोः स्त्वंनिधिः स यदा भवेत् ॥ प्रदोषेषु हरिं
दृष्वा नरकं यांतु सान्वयाः ॥२१॥ इत्थं ता न शापस्त्वत्र कुद्दालेशाख्यमाततेनोत् ॥ मल्लिंग परिपस्याभिः
संपूज्य घटसंभवः ॥२२॥ क्रोधाद्दाहतान्सर्वान् गत्वा ख्योमहामुनिः ॥ ॥अगस्त्य उवाच॥ ॥
वेदांतेषु विधीयते च वचनं भस्मत्रिपुंड्रादिकं ॥ रुद्राक्षाभरणं शिवांघ्रिपयसां पानं प्रसादादनं ॥ ध्यानं
तस्य तदन्यसर्वविषयत्यागो नृमोहादितं सर्वं त्याज्यचकाममार्गनिरता विप्राः कथं वैदिकाः ॥२३॥
पश्चिमाभिमुखं लिंगं बिल्वैरभ्यर्च्य पंकजैः ॥ धूपदीपैर्भक्ष्यभोज्यैः प्रदक्षिणनतिस्तवैः ॥ तुष्टाव देवं
नत्वेशं कुद्दाले त्र्यंबकं हरं ॥२४॥ ॥अगस्त्य उवाच॥ ॥ नमस्ते शार्वायत्रिपुरमथनांतायभवते
नमोवाक्यैर्वेदैः प्रतिपदनमोंतेकशरणाः ॥ अतस्त्वं सर्वेषां पतिरसि महादेव भगवन् उदासीनो
माभूस्तवनमनभावेषु वरद ॥२५॥ योवै रुद्रस्त्वमीशोऽहरहरि विधिभिः पालयस्यत्रिलोकं यांतु वेदा
श्चनिरिवित्सुरवरलोकमालोकयाद्यपूर्वं दुक्षितिवह्निवायुजलरवैर्युक्तस्त्वमष्टात्मकः कस्त्वां वेद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भवानगाधमहिमात्वांस्तोतुमीशोत्र कः॥२६॥ इत्थंमुनिः सकुद्दाले पूजयामास शंकरं॥ तदाप्रभृति
तत्सत्रं रुद्रमीतिकरं त्वभूत्॥२७॥ ताम्रपर्ण्यांतरे यहा जले स्नात्वा महेश्वरं॥ दृष्ट्वा देवं त्रिकुद्दालं
नराणां पापभीः कुतः॥२८॥ विष्णुत्रिनगरीवासे चक्रे गस्त्यो महामुनिः॥ ॥स्कंद उवाच॥ ॥त्रिकु
द्दालसंस्थं परंभीतिनाशं महेशं समाश्रित्य पापमुक्ता नराः स्युः॥ मुनेताम्रपर्णीजले स्नानतो वा न पापा
भिषंगो नराणां भवेद्धि॥ २९॥ ॥इतिश्रीशिवरहस्ये उग्राख्ये सप्तमांशे उत्तरभागे त्रिकुद्दालवै
भवे अष्टचत्वारिंशोध्यायः॥४८॥ ॥श्रीउग्रायनमः॥ ॥श्रीस्कंद उवाच॥ ॥ तद्दक्षिणे शिव
स्थानं पापनाशाभिधं महत्॥ जनानां वनवासानां सरस्तत्रास्ति निर्मलं॥ १॥ तस्मिन्सरसि पःस्ना
त्पाप चक्रस्य मोचके॥ गिरेः शृंगात्पतंतीव धारया ताम्रपर्णिका॥२॥ यः स्नात्वा तत्र धारायां पतंत्यां
च गिरेस्तटात्॥ तदंगसंगतं पापं विनष्टमखिलं भवेत्॥ जीर्णत्वचा विनिर्मुक्तो यथा भाति महोरगः॥
॥यथा मेघगणैर्मुक्तो भ्राजते दिवि भानुमान्॥४॥ तथैव धारात्रितयस्नानकृन्मानवो भवेत्॥ स्नात्वा
पापविनाशाख्ये सरसि स्वपितॄन्मुदा न॥५॥ संतर्पयेश्च विधिवत्सं चाशान्पितृमोचकः॥ अगस्त्याद्या
श्च मुनयः ससुरासुरमानवाः॥६॥ अत्र स्नात्वा विरजसो अभवंस्तत्र संप्लवात्॥ पापनाशेश्वरं तत्र समभ्य
र्च्य दिवौकसः॥७॥ स्तुवंति स्तुतिभिस्तत्र पापनाशेश्वरं विभुं॥ ॥देवा ऊचुः॥ ॥ ओं भो मुने भगवते
ससुरासुरौघपूज्याय शूल्याय नमोस्तु नित्यं भूलाघ भगवन्नव पापनाश॥ श्रीव्योमकेश पशुपाशवि
नाशके शआकाशकेशारगरध्वस्रसितावभास॥ शंभो त्वदुत्तुंगकपर्द संगतरंगिणीयं शिवताम्रपर्णी
सा मार्गशीर्षे हरति त्वकापापाद्रिभंगं कुरुते प्रसादात्॥९॥ गिरेः संपातजा तत्र पतंति मधुबिंदवः॥
॥मधुपतनी शाखा यस्त्वं छेशी रसिसन मे॥१०॥ तत्र तल्लिंगमुत्कृष्टं दृष्ट्वा पापैः प्रमुच्यते॥ ताम्रपर्णी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीशिवर॰७ मपर्णाचदृष्ट्वामुच्यंतिपातकैः॥ तद्वैपुण्यतमंसंस्थानंदर्शनात्पापनाशनं॥ १२॥ सर्वकामप्रदंपुंसांत
५९ त्रस्यात्पापनाशनं॥ तत्रास्तिदक्षिणेतस्यांदिशिमध्यार्जुनंस्थलं॥ १३॥ अर्जुनद्रुममूलेत्रदृष्ट्वालिं
गंकपर्दिनं॥ चित्रानद्यांनरःस्नात्वाचित्रपापैःप्रमुच्यते॥ १४॥ त्रिनेत्रंतत्रसंपूज्यमध्यार्जुनसमाव्ह
यं॥ सर्वसिद्धिमवाप्नोतिमुक्तपापोविराजते॥ १५॥ राजराजोयक्षपतिःस्वयंसंमध्यार्जुनेश्वरं॥ संपूज्यतत्र
देवेशं [illegible] तुष्टावेशंकृपाकरं॥ १६॥ ॥ वैश्रवणउवाच॥ ॥ नमस्तेदेवायत्रिपुरहरदक्षाध्वरभिदेवि
चित्रंनेत्रांभोजगदुदयरक्षादिकरणं॥ त्रिनेत्रंनेरूपंगरधरसुमांशंकरविभोप्रसन्नस्त्वंमेद्यवितरवर
महोहरसदा॥ १७॥ एवंतत्रार्जुनेस्थानेसंपूज्येवंमहेश्वरं॥ तत्रैववैश्रवणोदेवंयक्षराजत्वमाप्नुयात्॥
॥ १८॥ तत्रैवलक्षसंख्येवप्रवहंत्यःसुपावनाः॥ तासांमुखानिसर्वाणिताम्रासागरसंगमे॥ १९॥ शिव
लिंगानिभूरिशःताम्रपर्ण्यास्तटेशुभे॥ शिवक्षेत्राणितत्रैवब्रह्मेशंहरिकेशंचत्रिनेत्रंगदद्दारुणं॥ मा
नंगहरणंतत्रतंदृष्ट्वापापभंजनं॥ २१॥ गंडशैलंत्रिशूलेशंधनेशानयनार्चितं॥ स्थानेबुद्धार्कमुख्यंसुव
र्णगणपूजितं॥ २२॥ सिंधुतीरेहरिःपूर्वंशंकरेणैकनामगान्॥ नारायणःशंकरास्यस्तत्रविष्णुस्तस्मि
न्नेकांददौचसः॥ तल्लिंगसंगमाभियोछतिमानसंसेनारायणोभवविभोशिवशंकरस्त्व॥ २३॥ ॥
॥ श्रीउमायनमः॥ श्रीस्कंदउवाच॥ ॥ तदुत्तरेस्थानयुग्मंपत्रीशंसिद्धिदेश्वरं॥ सिद्धेरराधि
तंक्षेत्रंपावनंतत्रपापहं॥ १॥ हनूमतापूजितंचलिंगंहनुमदीश्वरं॥ पूजितंतत्रतुपुरापुराहनु श्रीशिव
मतास्तुतं॥ २॥ समुद्रतरणेवाहोर्बलंप्रमथनोबलं॥ हनूमतेदिशालदाकुर्वतेरक्षसांवधं॥ ३॥ ॥
हनूमानुवाच॥ ॥ शंभोनमस्तेस्तुबलंममाद्यामदेहिवाद्रोश्चसमुद्रलंघने॥ त्वांसंस्तुवन्यातिच
योनरोरिपून्भेवद्रणेतस्यबलंजयपश्च॥ ४॥ नवकैलासमुख्यानितत्रस्थानानिधूर्जटेः॥ ताम्रपर्ण्यो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तटे नानि दृष्ट्वान्यघहराणि वै ॥५॥ भद्रेश्वरं सोमनाथं मणीशं वारणेश्वरं ॥ सौरेश्वरं राजगिरिः धुम
नीशं हरेश्वरं ॥ ६ ॥ पन्नगेश्वरमित्येवं नवकैलाससंज्ञितं ॥ तेषु स्थानेषु देवेशं लिंगरूपं सदाशिवं ॥ ७ ॥
पूजयंति मुनिश्रेष्ठ सुरगंधर्वदानवाः ॥ ततः पांड्यकवाटं हि केरला द्वादशोत्तराः ॥ ८ ॥ ताम्रासागरसंगे वै
स्थानं पुण्यविवर्धनं ॥ त्रिचंद्रपुरमित्येवं माब्धितीरे ममैव हि ॥ ९ ॥ दर्शनात्काम दं न्नृणां मन्मूर्तिश्च
रूपणित्तः ॥ स्कंदतीर्थं सागरे वै स्नातानां पापवारकं ॥ १० ॥ तत्र मां घटजो दृष्ट्वा पूजयामास वै मुनिः ॥
लोकानां तुष्टिपूर्णाय ध्यर्थं ताम्रपर्णिका ॥ जलं सस्योपकाराय प्राणिपापापनुत्तये ॥ चकार ताम्रपर्णी वै
सेतुं वै सुरवर्धकिः ॥ १२ ॥ नव कैलासमुख्येषु स्थानेषु हरिणार्चितः ॥ महादेवो हरेः तुष्टः नवधा स्थान
मादिशत् ॥ १३ ॥ तेषु स्थानेषु निवसन्नु तु ष्टावेशं हरिर्हरं ॥ ॥ नमस्ते विभो चंद्ररेखावतंस महादेव शं
भो विभो रूप्यनिवास ॥ उमानाथ मन्नाथ शंभो प्रसीद प्रसादं मयि वेशानवक्रं मनोमे ॥ १४ ॥ स्तुत्वेवं तेषु कैला
सस्थानेषु नवधा हरिः ॥ उवास राघ्यन वधा लत्र कुद्दालकस्थले ॥ पंचैव पंचकोशानि तत्र लिंगानि
धूर्जटेः ॥ अगस्त्याद्याश्च मुनयः तत्र चित्रसभापतिः ॥ १६ ॥ दृष्ट्वानत्यंतमीशानं स्तुवंति विधिवि
धावः ॥ ॥ मुनिसुराः उवाच ॥ ॥ विचित्रं तवापारन त्वं प्रदो षेप्रपद्याम नान्यं समाद्यस्य पा
दं ॥ कृतार्था वयं धन्यमान्याग्रगण्याः भवामो भवाब्धेर्विमुक्ताश्च भक्ताः ॥ १७ ॥ ततः पंचकन्यका तीर्थं
सागरे पापनाशनं ॥ तत्र स्नात्वा पंचपापैर्मुच्यते मानवोत्रवै ॥ कुमार कांतं पदं पत्नी अनंतं प्राप्तुमुद्यता ॥
रमाप्रापपतिं तत्र ध्यायंती स्म हृदंबुजे ॥ १८ ॥ कन्यातं परिपूजेव दृष्ट्वा विदंति सत्पतिं ॥ अनंतोपि ततः
श्चात्केरल द्वारमास्थितः ॥ १९ ॥ भक्तकामप्रदः शि वेपे अनंतशायनो हरिः ॥ अनंतशायी देवस्य लिं
गं संपूज्य संस्तुवन् ॥ २० ॥ ॥ अनंत उवाच ॥ भवोद्भवजगत्पते बरूप्रमथनाद्याव मां प्रसीद दयया ॥

श्रीशिवर·७ धुनाविधुधरेशापापंहर॥ गरादनसुरावनविधिहरिंद्रवेदस्तुतनिरंजनसनातन तवपदाब्जयोर्मेनतिः
६० ॥२१॥ अनंतशायनोद्देशंसेवस्तत्रार्चयनतस्थिनः॥ तद्धायवां हरेः स्थानंजनार्दनसमाह्वयं॥२२॥
जनार्दनो हरंध्यायेनत्रतिष्ठतिपापहृत्॥ शुचींद्रकेरलेस्थानेशंभोःप्रियकरंमहत्॥२३॥ इंद्रस्तुव
न्नथेशानंशुचिस्तत्रार्च्यशंकरं॥ त्वष्टुर्वधाद्धिमुक्तोशुचींद्रेशप्रसादतः॥ ॥ इंद्रउवाच॥ नमो
नमस्तेशशिधामचूडगंगाधरेशानविभोप्रसीद॥ त्वष्टुर्वधादस्मदघान्महेश विमोचयध्वाशु तवप्रसा
दात्॥२४॥ विष्णुस्तत्रवसन्शंभोःप्रसादार्थंशुचींद्रके॥ तत्रस्थाण्वीश्वरंस्थानंब्रह्मणाराधितेस्तुतं
॥२५॥ तत्रैवेतिवर्ततेदेवोस्थाणुनाद्रोद्भवंतदा॥ ॥ब्रह्मोवाच॥ ॥अणोरणुस्त्वमहतोमहांस्त्वंस्था
णुस्त्वमाद्यःपुरुषःपुराणः॥ तवप्रसादाद्द्रुहुधाविसृष्टिं करोमिशंभोविविधांप्रसीद॥२६॥ ॥श्रीस्कंद
उवाच॥ ॥ एवंपांड्यसचोलकेरलभुवः स्थानेषुतीर्थेष्वके देवादैत्यवरामहर्षिनिकराःसंपूज्यवि
श्वेश्वरं॥ प्रापुःस्थानवरंशिवस्यरूपयासंपूज्यतेभक्तितः॥ पुण्येस्मिन्निति हासससमममहाशैवो
त्तरेपावने॥२७॥ जैगीषव्यतवार्थमेकथितमहेशान्येमहेशोदितं॥ मुख्यंमेकथितंनशक्यमधुनाव
क्तुंचसर्वस्थलं॥ श्रुत्वेदंनिखिलस्थलार्चनबलंप्रासरयलब्ध्वानरो॥ मुक्तः पातककोटिभिः शुभत
रेकैलासमोलोवसेत्॥२८॥ ॥इतिश्रीशिवरहस्येउग्रारव्यसप्तमांशेउत्तरभागेकेरलचोलपां
ड्यशिवक्षेत्रवैभवकथनंनाम पंचदशोध्यायः॥५०॥ ॥इतिश्रीउग्रारव्यसप्तमांशस्यउत्तरार्धः श्रीशिव
समाप्तिमगमत्॥ शुभंभवतु॥ श्रीउग्रायनमः॥ श्रीशिवायनमः॥ ॐ॥ श्रीसं·१९७७ पौषशु·८चंद्रे·

शक १९२१ ई·ज· ता·१७ समाप्तिमगमत·कन·

CC-0. Jangamwadi Math Collection. Digitized by eGangotri